कुसुमां· कारि
५ पृ. 1

स्यापिस्मृतिं प्रतिस्वध्वंसव्यापारकत्वमेवस्यात् ।स्यादेवेतिचेत् ।।अत्रवदंति।यागध्वंसस्यव्यापारत्वमभ्युपेत्यस्वर्गंतावद्धिन्नंप्रतियागध्वंसत्वेन हेतुत्वकल्पनेवि
शेषणविशेष्यभावे विनिगमनाविरहेण ध्वंसत्वविशिष्टयागप्रतियोगिकत्वेनापितत्र हेतुत्वस्यसंभवद्युक्तिकतयागौरवप्रसंगात् ।। अदृष्टस्वीकारे
तुनैवंतत्रविशेषणांतराप्रवेशेन विनिगमनाविरहासंभवात् ।। यागस्यादृष्टव्यापारकत्वमेवोचितमिति· वरुक्तरुक ·कर्मनाशाजलस्पर्शादि
नाश्यता[illegible]दकनिर्वचनानुरोधेनादृष्टसिद्धिः।। तथाहि। नयागध्वंसत्वं तन्नाश्यतावच्छेदकं ध्वंसस्यध्वंसानभ्युपगमात् ।। प्रकारांतरस्यतन्नाश्य
९५ तावच्छेदकस्यादृष्टानभ्युपगमेऽसंभवः।। अदृष्टस्वीकारेतु धर्मत्वादेरेवतथासंभवइत्यास्तांविस्तरः। एवमनुभवध्वंसस्यैवस्मृतिहेतुत्वपक्षे मुक्ता
दिगौरवप्रसंगात् ।।सर्वोपेक्षात्मकज्ञानादपिस्मरणापत्तेश्च नध्वंसद्वारकत्वमनुभवस्य किंतुसंस्कारद्वारकत्वमेव ।।एतन्मतेउपेक्षात्मकज्ञा
नत्वेनसंस्कारहेतुतयातदभावादेवास्मरणादित्याद्यन्यत्रविस्तरः ।। नन्वायात्वनयायुक्त्या अदृष्टं तथापितस्य भोक्तृनिष्ठत्वे मानाभावः भो ६८
ग्यनिष्ठतयाप्युपपत्तेरित्यतआह ।। संभोगइति।। संभोगः सम्यक्भोगः अन्यात्मनियतभोगइतियावत् ·निर्विशेषाणामदृष्टरूपविशेषाणामभू
ने२ न्यानामसंस्कृतैरदृष्टरूपसंस्कारवद्भिरपिभूतैः स्रक्चंदनवनितादिभिर्निर्वहतीत्यर्थः ।। तथाचभोगस्यनिष्ठत्वाभ्युपगमे व्यधिकरणत्वेनप्र
प्रतिनियतभोग्यनिर्वाहकत्वंनस्यादितिफलसमाधिकरणमेवाभ्युपेयते· अतएवदेवताप्रीतेरपिद्वारत्वं नेष्यतीत्यास्तांविस्तरः।। २।। ननुभोग्य
निष्ठमेवातीन्द्रियंतिष्ठतु·नचैवंभोग्यस्यप्रत्यात्मनियमानुपपत्तिस्तत्तदात्मीयभोगेप्रतिभोग्यनिष्ठादृष्टविशेषाणामंकुरत[illegible]आदिनिष्ठशक्त्यनुकूल
वह्निनिष्ठशक्तिविशेषाणामिवहेतुताभ्युपगमेनाप्युपपत्तिसंभवात् ।।नचदृष्टांतासिद्धिस्तत्र विधशक्तिविशेषमानाभावादितिवाच्यं।। तथा
विधशक्त्यनंगीकारेमणिसत्त्वेपिदाहापत्तेः।।नचमणेस्तत्रप्रतिबंधकत्वान्नतादृशापत्तिरितिवाच्यं।।कारणत्वभावत्वव्याप्यतयामण्यभावादेर्हेतु
त्वासंभवेनमणेस्तत्रप्रतिबंधकतायाअसंभवद्युक्तिकत्वात् ।।भवतुवातत्रतत्प्रतिबंधकं तथापिशक्तिस्वीकारस्यावश्यकःशक्तिकत्वेनैवतस्यप्र तत्र १८
तिबंधकत्वांगीकारात् प्रतिबंधकत्वस्यकारणाभावसंपादकत्वरूपत्वादित्यतआह।। भावोयथेति।। भावोवह्न्यादिर्यथाकारणंतथामण्यभावो शम
पितद्दाहकान्वयव्यतिरेकानुविधायित्वस्यतत्रसत्त्वात्।।कारणत्वस्यभावत्वव्याप्यत्वेदूषणमाह।। कार्यवदिति।। यथाध्वंसरूपाभावःकार्यंतस्या ५
प्रकृतेपीत्यर्थः।। अन्यथाकार्यत्वस्यापिभावत्वव्याप्यत्वमभ्युपेत्यध्वंसस्यापिकार्यत्वस्यांगीकारस्योचितत्वप्रसंगात् ।।इत्थंचभाववदभावस्यकारणत्वरूप
कारणत्वात्तद्विलंबादेवफलविलंबइतिकिंशक्त्येतिभावः।।मण्यादेःशक्तिनाशकत्वेनैवप्रतिबंधकत्वमित्यत्रदूषणमाह।।प्रतिबंध

- Title – कुसुमाञ्जलिकारिका व्याख्या
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 19/38
- Lines-
- Size
- Substance Paper –
- Script Devanagari देवनागरी
- Language – संस्कृत
- Period –
- Beginning – स्वापि स्मृतिं प्रतिस्वध्वंसव्यापारकत्वमेवस्यात्
- End – इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्री नारायणतीर्थ-कृता कुसुमाञ्जलिकारिकाव्याख्यासमाप्ता ॥
- Colophon-
- Illustrations -
- Source - दर्शन से सम्बन्धित
- Subject -
- Revisor -
- Author - परमहंसपरिव्राजकाचार्य श्री नारायणतीर्थ
1. Remarks- 1-3, व 12 पृष्ठ अनु०

शुद्ध महा/

कुसुमां॰ कारि स्यापि स्वर्गं प्रति स्वध्वंसव्यापारकत्वमेव स्यात् । स्यादेवेति चेत् ।। अत्र वदंति यागध्वंसस्य व्यापारत्वमभ्युपेत्य स्वर्गत्वावच्छिन्नं प्रति यागध्वंसत्वेन हेतुत्वकल्पने वि
४ प. शेषणविशेष्यभावे विनिगमनाविरहेण ध्वंसत्व-विशिष्टयागप्रतियोगिकत्वेनापि तत्र हेतुत्वस्य संभवद्युक्तिकतया गौरवप्रसंगात् ।। अदृष्टस्वीकारे
तु नैवं तत्र विशेषणतया प्रवेशेन विनिगमनाविरहासंभवात् ।। यागस्यादृष्टव्यापारकत्वमेवोचितमिति- वस्तुतस्तु -कर्मनाशाजलस्पर्शादि
नाश्यतावच्छेदकनिर्वचनानुरोधेनादृष्टसिद्धिः ।। तथाहि । न यागध्वंसत्वं तन्नाश्यतावच्छेदकं ध्वंसस्य ध्वंसानभ्युपगमात् ।। प्रकारांतरस्य तन्नाश्य
२५ तावच्छेदकस्यादृष्टानभ्युपगमे ऽसंभवः ।। अदृष्टस्वीकारे तु धर्मत्वादेरेव तथा संभवदित्यास्तां विस्तरः । एवमनुभवध्वंसत्वेन स्मृतिहेतुकत्वपक्षेऽपि
ऽगौरवप्रसंगात् ।। सर्वांशोपेक्षात्मकज्ञानादपि स्मरणापत्तेश्च न ध्वंसद्वारकत्वमनुभवस्य किंतु संस्कारद्वारकत्वमेव ।। एतन्मते ऽपेक्षात्मकज्ञा
नत्वेन संस्कारहेतुतया तदभावादेवास्मरणादित्याद्यन्यत्र विस्तरः ।। नन्वागामिनो ऽनंत्या गुरुतया अदृष्टं तथापि तस्य भोक्तृनिष्ठत्वे मानाभावः भो
ग्यनिष्ठतया ऽप्युपपत्तेरित्यत आह ।। संभोग इति ।। संभोगः सम्यक् भोगः प्रत्यात्मनियतभोग इति यावत् । निर्विशेषाणाम् अदृष्टरूपविशेषाणाम्भू ६८
२९ न्यानां सत्त्वेन दृष्टरूपसंस्कारवद्भिरपि भूतैः स्रक्चंदनवनितादिभिर्निर्वहतीत्यर्थः ।। तथा च भोग्यनिष्ठत्वाभ्युपगमे व्यधिकरणत्वेन प्र
प्रतिनियतभोग्यनिर्वाहकत्वं न स्यादिति फलसमानाधिकरणमेवाभ्युपेयमिति- अत एव वदता ग्रंथकारेण तद्विवरणं नेष्टं तीत्यास्तां विस्तरः ।। ७ ।। ननु भोग्य
निष्ठमेवास्तीत्यर्थं तिष्ठतु- न चैवं भोग्यस्य प्रत्यात्मनियमानुपपत्तिस्तदास्वीयभोगं प्रति भोग्यनिष्ठादृष्टविशेषाणां कारणत्वात् । आदिनिष्ठदाहानुकूल
वह्निनिष्ठशक्तिविशेषाणामिव हेतुताभ्युपगमेनाप्युपपत्तिसंभवात् ।। न च शक्तौ तासिद्धिस्तस्या विधरादिविशेषेऽभानाभावादिति वाच्यं ।। तथा
विधशक्त्यनंगीकारे मणिसत्त्वेऽपि दाहापत्तेः ।। न च मणेस्तत्र प्रतिबंधकत्वान्नैतादृशापत्तिरिति वाच्यं ।। कारणत्वाभाववत्त्वव्याप्यतया मण्यभावादे हे
तुत्वासंभवेन मणेस्तत्र प्रतिबंधकतायाश्च संभवद्युक्तिकत्वात् ।। भवतु वा तत्र तत्प्रतिबंधकत्वं तथापि शक्तिस्वीकारश्चावश्यकः- शक्तिकल्पने चैतस्य प्र तत्र १४
तिबंधकत्वांगीकारात् प्रतिबंधकत्वस्य कारणाभावसंपादकत्वरूपत्वादित्यत आह ।। भावो यथेति ।। भावो वह्न्यादिर्यथा कारणं तथा मण्यभावो शम
ऽपि तद्ग्राहकान्वयव्यतिरेकानुविधायित्वस्य तत्र सत्त्वात् ।। कारणत्वस्याभाववत्त्वव्याप्यत्वे दूषणमाह ।। कार्यवदिति । यथा ध्वंसरूपाभावः कार्यत्वस्या
प्रकृते पीत्यर्थः ।। अन्यथा कार्यत्वस्यापि भाववत्त्वव्याप्यत्वमभ्युपेत्य ध्वंसस्यापि कार्यत्वस्वीकारस्यानुचितत्वप्रसंगात् ।। इत्थं च भाववदभावस्यापि
कारणत्वात्तद्विलंबादेव फलविलंब इति किं शक्त्येति भावः ।। मण्यादेः शक्तिनाशकत्वेनैव प्रतिबंधकत्वमित्यत्र दूषणमाह ।। प्रतिबंधक

ह.श्रो.

ननु स्वर्गसिद्धौ तत्साधने योगे व्यापारतया दृष्टसिद्धिः स्यात्स एव तु नास्तीत्यत आह। विफलेति॥ विश्वे यां प्रेक्षावतां प्रवृत्तिर्न विफला नापि दुःखफला अत्रोभयत्र प्रेक्षा
प्रवृत्तिः पूरणीयः। ननु भवतु तथाविधप्रवृत्तिः सफला तथापि तस्याः स्वर्गफलकत्वे मानाभावः पूजाख्यात्यादिदृष्टफलकत्वेनाप्युपपत्तेरित्यत आह
भेति। दृष्टो यो लाभस्तत्फलापि न भवति तत्कामनया प्रवृत्त्यदर्शनात् तत्प्रत्यपि निरध्वस्तस्य व्यापारं विना जनकत्वानुपपत्त्या दृष्टस्यावश्यकत्वादिति भा नु प्रो
नु केनचित्प्रतारकेन स्वर्गादिफलकतया यागादिकं प्रत्याख्याप्यानुष्ठापयन्तमुं चिन्तितो लोकः प्रेतावानपि प्रवर्ततइत्यत आह॥ विप्रलंभ इति॥ एतादृशस्य लं
तारणापि न संभवतीत्यर्थः॥ क एतादृशो यः परवंचनार्थं नानाविधक्लेशसाधनेकप्रयासादिभिर्यावज्जीवमात्मानमवसादयेत्॥ परवंचनाजन्यस्वल्पदुःख
द्देशेन बहुविधक्लेशेनु प्रवृत्तेरनुचितत्वादिति भावः॥८॥ नन्वस्तु यागादेः स्वर्गजनकत्वं तथाप्यदृष्टस्वीकारो व्यर्थः अदृष्टं विनापि तस्मात्तादृशकार्यो
त्पत्तिसंभवात्॥ अनन्यथासिद्धनियतपूर्ववर्तित्वरूपकारणत्वासत्तेरित्यत आह॥ चिरध्वस्तमिति॥ अतिप्रसंगभियान्यत्र सर्वत्राव्यवहितपूर्ववर्
त्तित्वस्य कारणतायां शरीरघटकत्वात्॥ चिरध्वस्तं पूर्वविनष्टं यागादिकर्म अतिशयं व्यापारं विना फलाय मनागलं न समर्थमिति कालान्तरभाविफलोप

विफला विश्ववृत्तिर्नो न दुःखैकफलापि वा। दृष्टलाभफला नापि विप्रलंभोऽपि नेदृशः॥८॥
चिरध्वस्तं फलायालं न कर्मातिशयं विना॥ संभोगो निर्विशेषाणां न भूतैः संस्कृतैरपि॥९॥ राम

पत्तये यागादिव्यापारे कल्पनीये विशेषादृष्टमेव व्यापारः कल्प्यत इति यागस्य कारणत्वमुपपन्नमेवादृष्टसिद्धिरिति भावः॥ ननु तर्हि ... त्वात् यागध्वं
सस्य व्यापारत्वमास्तां कृतमदृष्टकल्पनेन॥ न च भावाभावयोरेकजनकत्वान्न यागध्वंसस्य व्यापारत्वमयुक्तम्। अभावस्य जनकत्वे कारणीभूताभाव
प्रतियोगित्वेन भावस्य प्रतिबंधकत्वापत्तेः अन्यथानुभवस्य स्मृतिं प्रति संस्कारव्यापारकत्वानुपपत्तेरिति दृष्टमेव स्वर्गादिफलजनने यागादेर्व्यापा
र इति वाच्यं॥ प्रतिबंधकसंसर्गाभावत्वेनैव कार्यमात्रं प्रति हेतुतया संसर्गाभावत्वावच्छिन्नकारणताया एव प्रतिबंधकशरीरघटकत्वात्॥ स्वावच्छि त्व५
न्नप्रतियोगिताकत्वसंबंधेनाभावत्वावच्छिन्नकारणताया अवच्छेदको यो धर्मस्तद्वत्त्वस्यैव प्रतिबंधकपदार्थत्वात्। तद्धर्मावच्छिन्नकार्यतानिरू
पिताभावत्वावच्छिन्नकारणतानिरूपितस्वावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नावच्छेदकताश्रयधर्मवत्त्वस्य तद्धर्मावच्छिन्नप्रतिबंधकत्व
पदार्थत्वादिति निष्कर्षः॥ तथा च प्रकृते यागध्वंसत्वेन कारणतया भावत्वेनाकारणत्वा यागस्य प्रतिबंधकत्वाप्रसक्तेः॥ कृतमदृष्टेनेनचेद्वमनुभव

2

कुसुमांजलि व्याख्या

५

नामपि विशिष्यकारणत्वाभ्युपगमात्॥ स्वाश्रयनिरूपितविजातीयसंयोगस्यैव तत्र कारणतावच्छेदकसंबंधत्वाभ्युपगमाद्वा दोषाभावात्॥ ननु व्री
ह्यारंभकादिना व्रीहित्वेन शक्त्यनंगीकारे दितस्यारंभकपरमाणवव्यस्य व्रीहिप्रयोजकशक्तिविशेषस्याभ्युपेयः अन्यथा व्रीहिवाये व्रीहिनामापरमाणुवत
भंगात्॥ परमाणुषु विशेषांतराभावात्॥ नतदारंभकपरमाणुभिर्व्रीहिरेवोत्पाद्यते न यव इति नियमासंभवादित्यत आह॥ स्वगुणा इति॥ परमा
णूनां ये पाकजजातीयाः स्वगुणास्तद्वैलक्षण्या इत्यर्थः॥ तथा च विलक्षणरूपरसादिविशिष्टाः परमाणव व्रीह्यारंभका इत्यभ्युपगमेनैव सर्वसा
मंजस्ये तत्प्रयोजकविलक्षणशक्तिस्वीकारो निर्युक्तिक इति भावः॥११॥ पत्रपाकजविशेषाः नसंति जलवायुप्रभृतिषु कथं विद्युदून्स्पर्शादि
कं न चिन्नेत्यत्र नियामकांतराभावात्तदनुकूलशक्तिरेव नियामिकाऽवश्यमभ्युपेया एवं देवतादेवता प्रतिमादौ प्रतिष्ठाजन्यश्चांडालादिस्प
र्शनाश्यः शक्तिविशेषोऽवश्यमभ्युपेयोऽन्यथा चंडालादिस्पर्शे पतितत्वजातः फललाभप्रसंगात्॥ शक्तिस्वीकारे तु नैवं॥ चंडालादिस्पर्शेन

निमित्ततद्देशसंसर्गादुद्भवानुद्भवादयः॥ दैवतासन्निधानेन प्रत्यभिज्ञानतोऽपि वा॥ श्रीरामाय नमः॥१२॥

तस्याः नाशाभ्युपगमात्॥ तदापूजाफलासंभवात्॥ ननु पूजाजन्यफलं प्रति प्रतिष्ठाजन्यादृष्टविशेषस्यैव स्वात्मगतस्य हेतुत्वं न ताहृशशक्तेः
चंडालस्पर्शे तददृष्टनाशादेव न पूजाफलमिति वाच्यं अदृष्टस्य व्यधिकरणतया चंडालादिस्पर्शेन नाशासंभवादित्यत आह॥ निमित्तभेदेति
अदृष्टविशेषादेवोद्भूतत्वादयो विशेषाननुरुक्तेः कल्पनागौरवादिति भावः॥ वस्तुतो निमित्तभेदसंसर्गात् उद्भूतानुद्भूतरूपादिजः उद्भवानुद्भवा
था४ उद्भूतानुद्भूतरूपादयो उत्पद्यंते इत्यर्थः॥ तत्रोद्भूतरूपत्वावच्छिन्नं प्रत्युद्भूतरूपत्वादिना हेतुत्वकल्पने नैवोद्भूतानुद्भूतरूपाद्युत्पत्तिनिर्वा राम
हात्तत्र शक्तिकल्पनं युक्तमिति भावः॥ उद्भूतत्वं च जातिः॥ शुक्लत्वादिना सांकर्यात्॥ अनुद्भूतत्वं तु शुक्लत्वादिव्याप्या जातिर्नानानचोद्भूतत्वमेव शुक्लत्वा
दिव्याप्यजातिर्नानाकुत इति वाच्यं॥ उद्भूतत्वस्य नानात्वाभ्युपगमे वह्नित्वप्रत्यक्षत्वावच्छिन्नं प्रत्युद्भूतरूपहेतुताया व्यभिचारप्रसंगात्॥ तत्रोद्भूतत्वस्या ५
ननुगतत्वे नानुगतकारणतावच्छेदकासंभवात्॥ अनुद्भूतत्वं नानात्वदभावश्चोद्भूतत्वमिति प्रक्षेतु नोननुगमस्तत्तदनुद्भूतत्वकूटाभावत्वविशिष्टरूप

॥सामग्र्येकारणाभावः प्रकृते मरणादिसद्धेतुसत्त्वे योऽभावः तथा च मरणादिरूपविसामग्रीलक्षणकार्यप्रतिकूलकत्वं तया पुरुषादीनां प्रतिबंधकत्वं मरणादी
॥नां तु कारणीभूताभावप्रतियोगित्वमिति तदनुसंधेनापि शक्तिसिद्धिरावश्यकीति भावः॥ ननु शक्तत्वावच्छिन्नं प्रति मण्यादिनाना प्रतिबंधकत्वकल्पने गौरवात्
॥कुंठितत्वशक्त्यादिनिष्ठशक्तिविशेषमंगीकृत्य तस्यैव तत्र हेतुकल्पनमुचितमिति वाच्यं॥ मणिसत्वे उत्तेजकाभावादिसत्वे दाहानुत्पत्तिप्रसंगात्। तत्र शक्ते संकुंठितत्व
॥हेतुमरणादिसत्वेनाकुंठितत्वाभावत्तया कुंठितत्वरूपकारणतावच्छेदकावच्छिन्नशक्तिरूपकारणस्याभावात्॥ न चोत्तेजकाभावकुंठनेनाशकत्वांगीकार
॥न्नं दोष इति वाच्यं॥ तथापि तावत्कल्पने गौरवेण लाघवान्मरणभावत्वे हेतुत्वकल्पनस्यैवोचितत्वात्॥ न चैतन्मतेपि उत्तेजकसत्वे मणिसत्वेपि दाहोनस्यादिति वा
॥च्यं॥ उत्तेजकाभावविशिष्टमरणभावस्य हेतुत्वाभ्युपगमात्॥ तत्रादिविशिष्टाभावः उत्तेजकसत्वे मणिसत्वे उत्तेजकाभावरूपविशेषणाभावात्॥ कश्चित्तु विशेष्या
॥भावात्॥ यथा मरणभावे उत्तेजकेवसती त्यन्यत्र विस्तरः॥ ननु वस्त्वादौ तत्कारणात्तेन वसहोलन्यानित्येच नित्यैव शक्तिः सनास्ति चेन्मा भूत्तथापि शक्तिस्तु स्या
॥त्॥ तथा हि॥ व्रीहीन्प्रोक्षति व्रीहीनवहंतीत्यनेन प्रोक्षणस्यावघातहेतुत्वं प्रतीतं तच्च विशती तस्य कालांतरभावघातप्रति व्यापारं विनानुपपन्नमिति॥ तत्र
॥प्रोक्षणादिजनितशक्तिविशेषव्यापारो व्रीह्यादिवेव कल्पते योग्यतत्कलार्थितयाकिंचित्तत्तत्वानिशयजनकत्वं न विप्रमात्॥ न चैतादृशनियमस्याप्रयोज

भावोयथातथाभावः कारणं कार्यवन्मतः॥ प्रतिबंधो विसामग्री तद्धेतुः प्रतिबंधकः॥ ३॥ श्रीरामाय नमः॥ ॥॥
संस्कारः पुंसएवेष्टः प्रोक्षणाभ्युक्षणादिभिः॥ स्वगुणाः परमाणूनां विशेषाः पाकजादयः॥ श्रीरामाय॥ ११॥

कत्वात्तत्रात्मनुदृष्टविशेषरूपव्यापारकल्पनमेवोचितमिति वाच्यं॥ अदृष्टस्यव्रीह्यसंबद्धतया तदवघातप्रयोजकत्वात्॥ न च स्वाश्रयसंयोगित्वं संबंधः व्रीह्यंतर
साधारणत्वात्॥ एवं च प्रकृते यागादितः शक्तिविशेषरूपव्यापार एव भोग्यत्वं कुर्यन्नात्मेत्यंगीक्रियतां नत्वदृष्टविशेषं आत्मनीत्यत आह। संस्कार इति। प्रोक्षणा
भ्युक्षणादिभिः व्रीहिप्रोक्षणादवांतरभेदात्मकाभ्युक्षणादिभिः व्रीहिनिष्ठः संस्कारो दृष्टविशेषलक्षणः पुंसएवेष्टः पुरुषस्यैवांगीक्रियते ननु व्रीह्यादिषु शक्ति
रूप इति पूर्वश्लोकार्थः॥ तत्र हेतुरूप्यः सम्यगध्यासकृतव्रीहिविच्छाया एकालस्याः स्वीकारे यत्किंचिद्व्रीहिनाशे तन्नाशेव्रीह्यंतरस्य प्रयोगो न स्यात्॥
न च यावत्संभवापि कारणनाशस्य नाशकत्वागौरवात्॥ प्रतिव्रीहिशक्तिकल्पने च गौरवात्। न चैवं सत्यवघातस्य स्वाश्रयसंयोगित्वसंबंधेनैव रूपप
रंपरासंबंधेनैव हेतुतया अप्रोक्षित व्रीहिष्वपि तदापत्तिरिति वाच्यं॥ प्रोक्षिता एव व्रीहयो दलनीया नाम कल्पेरन्नत इति वाक्यशेषादिबलतः प्रोक्षितव्रीहिना

१ नन्वेवंनानाप्रकारोदृष्टफलयागाद्यादृष्टस्यालेप्यदृष्टविशेषस्य कर्तर्येवाभ्युपगमप्रसंगः एवं च तदभ्युपगमे लाघवात् फलवैयधिकरण्यं तु व्रीह्यादावपि समानमिति चेन्मैवं फलसामा
२ न्यप्रसंगे विनिगमकत्वात् नवास्मिन्पक्षे व्यदृष्टं प्रतिष्ठापद्यते परंपरासंबंधेन हेतुत्वप्रसक्तौ गौरवादिति वाच्यं इष्टविशेषात्मक अदृष्टेरदृश्यत्वात्‍ व्याप्तिरिक्तविषयता विशेषसंबंधेनादृष्ट

कुसुमां॰ व्याख्या॰ ६ प्र॰

माह॥ कर्त्तुर्धर्मा इति॥ नियंतारः कृतिसामानाधिकरणनियामकाश्च दृष्टादयः कर्त्तुर्धर्माः कृत्याश्रयस्यैव धर्माः नियामकस्य नियम्यसामानाधिकरण्यनियमादिति
भावः॥ चेतिता च स एव न इति॥ नत्वस्माकं नैयायिकानां चेतिता चैतन्याश्रयः स एव कर्त्तेत्यन्यथा कृतेः समानाधिकरणज्ञानस्याभावः स्यात्॥ चेतनो हि कर्त्ता
जैनैर्तिमतानिर्बाधकं विनाश्रमत्वायोगश्चेत्याह स्वयं बोध्यं॥ धर्माधर्मौ बुद्धिजत्वधर्मत्वे हि धर्मौ॥ अन्यथेति॥ बुद्धितत्त्वे धर्माधर्मौ स्वीकारे इत्यर्थः॥ इदं च
बुद्धितत्त्वयोगिका व्यवस्था बोध्यं॥ तस्यानित्यत्वाभ्युपगमे दोषमाह॥ अनिर्मोक्षो वा ध्रुव इति॥ संसारस्यैवानुच्छेदप्रसंग इत्यर्थः॥ यदि बुद्धितत्त्वस्य नित्यत्वं 5
अनपवर्गः स्यात्॥ अनिर्मोक्षप्रसंगादित्यर्थः॥ नित्यबुद्धितत्त्वधर्माधर्मजन्यभोगस्य सर्वदा सत्त्वात्ततः सर्वदा संसारसत्त्वादिति भावः॥ ३ ∧ नतरां तज्जन्यमवश्यं वाच्यं
अनित्यभावस्य जन्यत्वनियमात्॥ एवं च बुद्धितत्त्वोत्पत्तिपूर्वकाले बुद्धितत्त्वाभावेन तदाश्रितधर्माधर्मादेरप्यभावात्। बुद्धितत्त्वोत्पादस्यैवासंभवः तद्धेतु
भूतेनु तत्कार्यशरीरेन्द्रियादेरभावेन संसारस्योच्छेदप्रसंग इति भावः॥ १४॥ ननु भवंतु धर्माधर्मादयश्चेतनधर्मास्तत्र न तु न नित्यो विभुः किंतु शरीरमेव गौ
रोऽहं जानामीत्यादिप्रतीत्या गौरत्वज्ञानवत्त्वयोः समानाधिकरण्यग्रहात्॥ जडभूतकार्यत्वेपि शरीरस्य ज्ञानवत्त्वं तु मदशक्तिवदिति वदतां चार्वाकानां मतं
दूषयति॥ नान्यदृष्टमित्यादि॥ अन्यदृष्टस्यान्येन स्मरणादर्शनात् देवदत्तेनानुभूतस्य यज्ञदत्तेन स्मरणप्रसंगात् अनुभवस्मृत्योः सामानाधिकरण्यमवश्यमेष्ट

नान्यदृष्टं स्मरत्यन्यो नैकभूतमपक्रमात्॥ वासनासंक्रमो नास्ति न च गत्यंतरं स्थिरे॥ १५॥ रामायनमः॥

व्यं शरीरस्य चैतन्याभ्युपगमे तु बाल्यशरीरेऽनुभूतस्य यौवनशरीरे स्मरणं न स्यात्॥ बाल्ययौवनदशावस्थितयोः शरीरयोर्दशाभेदेन भेदात्कारस्यानुभ
वस्यैकाधिकरण्यानधिकरणत्वादिति भावः॥ ननु दशाभेदेप्येकमेव शरीरमतो न दोष इत्यत आह॥ नैकभूतमिति॥ बाल्ययौवनशरीरं नैकमित्यर्थः॥ तत् स्तबकां॰
त्र हेतुमाह॥ अपक्रमादिति॥ पूर्वशरीरनाशादित्यर्थः॥ परिमाणनाशप्रत्याश्रयनाशस्य हेतुत्वाद्यौवनशरीरनाशाभ्युपगमे तद्वृत्तिह्रस्वत्वरूपपरिमाण
स्याप्यनाशोऽभ्युपेयः आश्रयनाशं विना परिमाणनाशासंभवात्॥ नन्वन्यस्य हेतुत्वात्॥ तथा च यौवनदशायां तदुपलंभप्रसंगः॥ दीर्घत्वरूपपरिमाणानु राम
पलंभप्रसंगश्च॥ परिमाणवति परिमाणांतरानुत्पत्तिनियमेनैव एककालावच्छेदेन परिमाणद्वयस्य विरुद्धत्वादिति भावः॥ ननु स्मरणं प्रति स्वाश्रय
जन्यत्वरूपपरंपरासंबंधेनानुभवजन्यवासनाया अपि हेतुत्वं कल्पनीयं तथा च बाल्यशरीरानुभूतस्यापि किंचित्तदवयवानुभूतत्वनियमेन नानेन सं
बंधेन बाल्यशरीरानुभवजन्यवासनाया यौवनशरीरेपि सत्त्वान्नानुपपत्तिरित्यत आह॥ वासनासंक्रमो नास्तीति॥ उक्तपरंपरासंबंधेन वासनायाः
हेतुत्वं न संभवतीत्यर्थः॥ तथा च माननुभूतस्य गर्भस्थेन स्मरणप्रसंग इति भावः॥ ननूक्तपरंपरासंबंधेनोपादानगतवासनाया हेतुत्वाभ्युपग

त्वस्यैवतत्तानुगतकारणतावच्छेदकत्वसंभवादिति दिक्॥ एवमित्यादि द्वितीयकल्पेदूषणमाह॥ देवतेत्यादि॥ अत्र देवता इत्युत्तरं पूजाफलदायिन्य इति पूरणीयं॥ तथाच सन्निधा
नेन प्रतिष्ठाजन्यदेवताभेदादिज्ञाने जन्यादृष्टेन देवताः पूजाफलदायिन्य इत्यर्थः॥ नचैवं प्रतिमायां च चण्डालस्पर्शे पूजातस्तत्फलापत्तिः चण्डालस्पर्शेन तत्र तददृष्टनाशाभ्युप
मात्॥ फलासंभवात्॥ नचादृष्टस्य व्यधिकरणतया कथमदृष्टनाशकत्वमिति वाच्यं॥ तददृष्टनाशं प्रति चण्डालस्पर्शस्य स्वाश्रयमनिष्ठ[illegible]यितद्विजातीयसंयोगसंबन्धेन हेतु
ताभ्युपगमेनानुपपत्तेरभावादित्यादिस्वयमेवो[illegible] प्रतिष्ठातस्तत्कर्तृकदृष्टमनभ्युपगम्याप्याह॥ प्रत्यभिज्ञानतइति॥ इयं देवता प्रतिष्ठितेति प्रतिष्ठितत्वज्ञानादित्यर्थः॥ त
[illegible]
[illegible]
[illegible] १२ [illegible]
[illegible] 6
मितितन्मतं दूषयितुमाह॥ जयेतरेति॥ जयपक्षादितरः पराजयः तस्मिन्निमित्तस्यादृष्टविशेषस्य॥ परीक्ष्यपुरुषसमवेतस्य वा तिरो[illegible]भावउत्पत्तिलाभाय परीक्षाविधयो मताः
स्वीकृतारत्यर्थः॥ तथाच परीक्षाविधिभिर्जयपराजयान्यतरजनकादृष्टनिरोधउत्पाद्यते तेन नचतयान्यतरनिर्णय इति भावः॥ नच विनिगमकाभावात्तुलायामेव
शक्तिः कथं नाद्रियत इति वाच्यं॥ परस्परसंयुक्तानेककाष्ठादिरूपतुलायां शक्तिकल्पनापेक्षया पुरुषसमवेतादृष्टकल्पने लाघवस्यैव विनिगमकत्वादिति सा

जयेतरनिमित्तस्य स्थितिलाभायकेवलम्॥ परीक्ष्यसमवेतस्य परीक्षाविधयो मताः॥ १३॥ रामाय नमः॥
कर्तृधर्मा नियन्तारश्चेतिता च स एव नः॥ अन्यथानपवर्गः स्यादसंसारोऽथवा ध्रुवः॥ १४॥ श्रीरामाय नमः॥

ना१ स्मान्निरस्तः॥ १३॥ ननु सिद्ध्यत्वदृष्टं भोगनियततया पुरुषसमानाधिकरणं तत्वात्मसमवेतं सुखदुःखादिलक्षणभोगस्यात्मधर्मत्वासंभवात्॥ तस्य बुद्धि
तत्त्वधर्मत्वात्॥ तथाहि॥ आत्मा तावत्पुरुषस्तेन तत्त्वादृष्टोऽप्रसवधर्मित्वविवेकित्वात्रिगुणत्वादिसंगत्वादिधर्मवान् कूटस्थनित्यः पुष्करपला
शवन्निर्लिप्तो जन्यधर्मानाश्रयोऽकारणमकार्यं स्वाभाविकचैतन्याश्रयश्च॥ अन्यथा बुद्धितत्त्वे चैतन्याभिमानानुपपत्तेः॥ स्वाभाविकत्वोक्त्या न
कुसुमगते न कुसुमे सत्येव स्फटिके लौहित्याभिमानात्॥ चैतन्यस्य धर्मधर्मिणोरभेदात्॥ बुद्धितत्त्वं तु सत्त्वरजस्तमोगुणात्मकमनादिपरिणामिनि
त्यप्रकृतेर्जडांशाः परिणामविशेषो महत्तत्त्वापरपर्यायस्तस्यैव धर्मो दृष्टादिकं अन्यथा पुरुषस्य कर्तृत्वादिमत्वे तदवभासकत्वान स्वरूपतान
स्यात्॥ तदस्येव दीपप्रकाशादौ तदवभासकत्वदर्शनात्॥ चेतनोऽहं कर्तेत्यादिप्रतीतिस्तु बुद्धितत्त्वे ज्ञानवत्त्वविषया पुरुषे च कर्तृत्वविषया पुरुषे बु
म१ द्धितत्वस्य बुद्धितत्त्वे च पुरुषस्य प्रतिबिम्बलक्षणसंनिधानजा भ्रान्तिरेव चैतन्याकर्तृत्वयोरभिव्याधिकरणकत्वसाधारणादिनिरासाः तद्रूपदिनु

कुसुमांजलि का० प्र० स्येसंदेहस्तत्राह ॥ नेति प्रामाण्ये ज्ञान प्रामाण्यमात्रे कृतः विरोधतः सामान्यतो ज्ञानस्यापि प्रामाण्यसंदेहे संदेहसिद्धिप्रसंगादित्यर्थः ॥ ननु ज्ञान
७ प्रामाण्यमात्रेन संदेहः किंतु प्रत्यभिज्ञा प्रामाण्ये स इत्यत आह ॥ एकतेति ॥ येन प्रमाणेन विरुद्धधर्माद्दिनाऽऽलिंगस्येकघटस्यैकत्वग्रहणेन नाना
त्वं किंतु एकतानिश्चयस्तेन प्रमाणेन स्थिरे स्थिरत्वपक्षेपि नाना नानो घटस्यैकतानिश्चयोमतः संभवति ॥ एकस्य नानादेशनानास्थान
नवज्ञानाकालसंबंधस्याप्यविरोधात् ॥ एवं च विरुद्धधर्मविरहे तत्प्रामाण्यं निश्चयेन तत्प्रामाण्येपि संदेह इति भावः ॥ १७ ॥ ननु पौर्वापर्य
त्वासिद्धत्वं दृष्टं परंतु तस्य परलोककारणत्वमनुपपन्नं कारणत्वस्यापारमार्थिकत्वेन पारमार्थिकादृष्टवत्त्वासंभवात् ॥ न च कारणत्वं पार
मार्थिकं तथात्वे तस्य नीलादिवत्सर्वसाधारण्यापत्तेरत आह ॥ हेतुरस्मिन्निति ॥ पारमार्थिकनीलादिवेधर्म्येण कारणत्वमपारमार्थिकं मित्य
भिप्रायो न सम्यक् ॥ कार्यकारणभावाभावे नीलादेरप्यपारमार्थिकत्वापत्तेः अकारणकं हि गगनवन्नित्यं स्यात् ॥ अकारणं हि शशविषा
णवत्तुच्छं स्यात् ॥ तत्राद्यमानाभावेन न संभवतीति द्वितीयं स्यादित्याह ॥ हेत्विति ॥ ननु भवतु कारणत्वमपि पारमार्थिकं तत्पुनः स्वाभाविकमै
वाधीनं स्थैर्ये दृष्टयोर्न संदेहस्तेन प्रामाण्ये विरोधतः ॥ एकतानिश्चयो येन क्षणेते न स्थिरे मतः ॥ १७ ॥ राम
हेतुरस्मिन्मना दृष्टे नीलाद्यपि न जन्तुसत् ॥ तद्युक्तं तत्र दृष्टमिति साधारणं न किं ॥ १८ ॥
वसाध्यं ॥ तथा च कारणत्वं न कार्योत्पत्तिप्रसंगः स्वभावसिद्धस्य तस्य सर्वदा विद्यमानत्वात् ॥ तत्राह ॥ तद्युक्तमित्यादि ॥ तद्युक्तं सहकारियु
क्तं तत्कारणं तत्र कार्येश कं तथा च सहकार्यभावान्न सर्वदा कारणात्कार्योत्पत्तिप्रसंग इति भावः ॥ ननु कारणत्वस्य स्वाभाविकस्य नीला
दिवत्सर्वसाधारण्यप्रसंग इत्यत्र दोषापत्तिमाह ॥ इति साधारणमिति ॥ नहि नीलादेः स्वरूपं न विद्यमानत्वं पीताद्यवच्छिन्नपत्तेरपि तु सर्वैर्नी
लत्वादिना प्रतीयमानत्वं कारणत्वेपीदृसाधारण्यं संभवत्येवं सर्वैः कारणस्य कारणत्वेन प्रतीयमानत्वात् ॥ दण्डः सकलकार्यकारणं
५२ स्यादिति साधारणं नीलादिवदस्वाभाविकः ॥ इति भावः ॥ १८ ॥ ननु दृष्टं नाम समवायिकारणकं आत्मनोनित्यतया कालिकव्यतिरेकासंभ राम
वेनान्वयव्यतिरेकाभ्यां कारणत्वमपि कारणत्वलक्षणासंभवादत आह ॥ पूर्वभावोहीति ॥ हेतुत्वं कारणत्व ७
पूर्वभावः अनन्यथासिद्धनियतपूर्ववर्तित्वरूपं न तु व्यतिरेकगर्भमित्यर्थः ॥ ननु मास्तु लक्षणप्रविष्टतया व्यतिरेकापेक्षा ग्राहकतया तु सा

सिद्ध१

मात्रसेवरस्याह।।नवगत्यंतरस्थिरइति।।द्वारिकलापक्षे वासनासंक्रमरूपस्मरणं नगत्यंतरमस्तु पथधते क्षणिकपरमाणुरूपस्य महत्स्वरूपपूर्वशरीरस्यत
दृशोत्तरशरीरे व्यवधानत्वात्।।न स्थिरपक्षे तन्मते करादीनामेव शरीरैकपार्श्वभावात्।।तथा च छिन्नेकरादौ तेनानुभूतस्पर्शवदुत्तरशरीरे स्मरणं न स्यात्।।एवं
उत्तरशरीरे करादेरुपादानत्वाद्वासनानंतेन संबंधेन करगतवासनायाः संक्रमाभावात्।।इतिभावः।।१५।।ननु क्षणिकतापक्षे एवं तन्मते पूर्वोत्तरशरीरस्यास्मरण
संभवात्तत्राह।।न वैजात्यं विनेति।।वैजात्यं कुर्वद्रूपत्वजातिं विना न तत्स्यात् न क्षणिकत्वं स्यात्।।क्षणिकत्वं न सिद्धेदिति यावत्।।अयं भावः।।क्षणि
कत्वं तदैव सिद्धेद्यदि कुर्वद्रूपत्वजातिरस्ति अन्यथा घटत्वादिनवधिन्नं प्रति दंडत्वादिनैव हेतुत्वं कल्पनीयं।।न च तत्संभूति कुशूलस्थबीजे दृष्टं कुरो
त्पादापत्तेः सहकारिमंतरकल्पनेनगतं सक्षणिकत्वेन स्थिरपक्षेऽपि बाधकाभावादिति।।क्षणिकत्ववादिनाकुर्वद्रूपत्वजातिरवश्यं भंगीकार्येति।।नन्वस्तु
कुर्वद्रूपत्वं जातिः तथासति का क्षतिरित्यत आह।।न तस्मिन्निति।।तस्मिन्कुर्वद्रूपत्वे सति अनुमानं न भवेत्।।धूमादिना वह्न्यादेरनुमानं न भवेत्।।
वह्निधूमयोर्व्याप्तिग्रहासंभवादित्यर्थः।।अयं भावः।।उपस्थितवह्नित्वादिकं विहाय केन चिद्वैजात्येन वह्नेर्हेतुत्वे उपस्थितधूमत्वादिकं विहाय केन

न वैजात्यं विना तत्स्यान्न तस्मिन्ननुमा भवेत्।। विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना।।१६।।रामायनमः।।

चिद्वैजात्येन कार्यता वाच्या तथा च धूमत्वावच्छेदेन वह्निकार्यग्रहेऽनुकूलतर्काभावेन वह्निधूमयोर्व्याप्तिग्रहासंभव इति।।ननु चार्वाकस्य ममैतदिष्ट
मेवेत्यत आह।।विना तेनेति।।तेन विना अनुमानेनाविनाऽनन्तत्सिद्धिः क्षणिकत्वसिद्धिः तथा चानुमानस्य प्रमाणत्वेन क्षणिकत्वसिद्धिरेव न स्यात्।।
कुर्वद्रूपत्वाद्यनुमाने नैव सामग्री प्रविष्टस्य नतः प्राप्तिं धूमानामेव साधनादितिभावः।।ननु प्रत्यक्षादेव क्षणिकत्वसिद्धिर्भविष्यतीति।।तत्राह।।ना
ध्यक्षं निश्चयं विनेति।।प्रत्यक्षं हि निर्विकल्पकं तव मते प्रमाणं।।तच्च सविकल्पकं कल्प्यं न च सक्षणिकत्वमिदमितिसविकल्पकं कस्यचिदप्यस्तीत्य
र्थः।।अपि च व्रीहित्वं विहाय कुर्वद्रूपत्वं यदेतद्विहाय व्रीहित्वस्य कुशूलस्थसत्वे न सामग्रीनिविष्टेन धान्येत द्विनयसत्वेन कुर्वद्रूपत्वं न जातिः।।स्या
कार्यादितिसंक्षेपः।।१६।।ननु मास्तु क्षणिकत्वस्थैर्ये तु नासिद्धाविति संदेहमग्राहतात्वादिति।।सोऽयं घट इत्यादिति।।न ता वत्स्थैर्ये संदेहः स एवा
यं घट इति प्रत्यभिज्ञारूपस्य तन्निश्चयस्य सत्वात्।।नापि तथाविधप्रत्यभिज्ञारूपदृष्टौ संदेहानुव्यवसायेन तन्निश्चयमात्र।।ननु स्तोन प्राम

8

राम

कु.कु.ञ्जा.व्या. द्वि. २

मूलत्वात्सर्वेषां कारणत्वात् ॥ प्रकृतिः प्रकृतिपदवाच्या तेन सांख्योक्तातिरिक्तप्रकृतिर्दूषिता ॥ प्रबोधतः तत्त्वज्ञानं तस्य भयात् ॥ तस्य निरोधात् ॥ अपि चेति ॥ उक्तेति निर्बन्धः एतेन वे-
दातिरिक्ता मूलाविद्या दूषिता ॥ असौ देवः विरतप्रसंगस्य रचनायाः कल्लोलः परं पूर्णस्य कोलाहलः किं न कर्ती श्वराज्ञाकरस्य साक्षी तथा स्वयमेव निर्गुणमुक्तीश्वर मनसा साक्षा-
त्साक्षात्कारज्ञानवद्भ्रांतिजन्ययुग ॥ २ ॥ इति प्रथमस्तबकव्याख्या समाप्ता ॥ ॥ श्रीगणेशाय नमः ॥ नन्वास्तु अलौकिकं तथापि नेश्वरसिद्धिः न वाचेतन न चेतनाधिष्ठितमेव कार्यं जनकमि-
ति नियमबलेन कुलालादिवदीश्वरसिद्धिरिति वाच्यं ॥ नादृष्टनियमप्रमाणाभावात् ॥ न चाप्तोक्तत्वेन शब्दप्रामाण्यं तन्नमिति वेदप्रामाण्यान्यथानुपपत्त्या ईश्वरसिद्धिरिति वाच्यं ॥ तस्य स्व-
तस्त्वे प्रमाणाभावात् ॥ नित्यनिर्दोषत्वेनैव प्रामाण्यसंभवादित्यत आह ॥ प्रमायाः इति ॥ प्रमायाः प्रमात्मकविशिष्टत्वेन ज्ञानस्य परतन्त्रत्वात् ॥ गुणजन्यत्वनियमात् ॥ अयं भा-
वः ॥ शाब्दप्रमां प्रति वक्तृयथार्थज्ञानं गुणविधया हेतुः ॥ अन्यथा तद्वाक्यत्वासंभवात् ॥ तथा चेश्वराभावे वेदवाक्यशाब्दप्रमोत्पाद्यता न स्यात् ॥ वक्तुरभावेनोपदर्शितकारणाभाव-
दित्युपदर्शितकारणासत्त्वेऽपि सर्गादौ ईश्वरो वक्ता स्वीकर्तव्य इति ॥ ननु प्रवाहानादिवेदः पूर्वपूर्वाध्यापककर्तृवाक्यार्थज्ञानमेव गुणविधया हेतुरिति नेश्वरसिद्धिरत आह ॥ स-
र्गप्रलयसंभवादिति ॥ सर्गप्रलययोर्व्यवस्थापयिष्यमाणत्वादित्यर्थः ॥ एवं च प्रलयेऽध्यापकोच्छेदे सर्गादौ आद्यशिक्षकस्य वेदवाक्यार्थज्ञानं गुणः स वक्ता भगवानित्यर्थः ॥ ननु सर्गा-
दौ पूर्वसर्गोपार्जितयोगजधर्मवशाल्लब्धसाक्षात्कृतशेषपदार्थाः कपिलादयो वक्तारो भविष्यन्ति किमीश्वरेणेत्यत आह ॥ तदन्यस्मिन्निति ॥ प्रतिसर्गं तत्स्थपुरुषेषु एव भगवान्

प्रमायाः परतन्त्रत्वात्सर्गप्रलयसंभवात् ॥ तदन्यस्मिन्ननाश्वासान्न विधान्तरसंभवः ॥ १ ॥ श्रीरामाय नमः ॥

अनेकत्वे गुणवत्कल्पनायां गौरवमिति भगवानेवैकः कल्पनीयः ॥ अदृष्टवशात्सर्वत एव सर्गादौ कश्चिदेव वक्ता स्वीक्रियते तत्रैव वचसि नाश्वास इत्यर्थः ॥ तस्मादीश्वरं विना
न वेदप्रामाण्यमित्याह ॥ न विधान्तरसंभव इति ॥ अपि च प्रमात्वं गुणजन्यत्वादिनानुमेयं तथा च तदनुरोधेनापि गुणजन्यत्वसिद्धिः ॥ ननु भवत्येव प्रामाण्यस्य परतस्त्वे
तदेव न संभवति ॥ मीमांसकैः प्रामाण्यस्य स्वतस्त्वाभ्युपगमात् ॥ तथा हि ॥ प्रामाण्यस्य स्वतस्त्वं प्रामाण्यग्राहकप्रतिबन्धकाभावकालीनप्रामाण्याश्रयज्ञानग्राह-
कसामग्रीग्राह्यत्वं तत्र गुरुमते ज्ञानं प्रकाशत्वात् स्वतः एव ज्ञानं स्वप्रकाशमिति प्रामाण्यं प्रामाण्यग्रहप्रतिबन्धकाभावकालीनप्रामाण्याश्रयीभूतम-
प्रतिशिष्टं व ज्ञानवि[illegible]षयकत्वरूपं स्वतस्त्वं ॥ मुरारिमते तु अनुव्यवसायेन प्रमात्वेन गृह्यत इति प्रामाण्यग्रहप्रतिबन्धकाभावकालीनप्रामाण्याश्रयज्ञानविषयकयावज्ज्ञानग्र-
हत्वरूपं स्वतस्त्वं ॥ भट्टमते ज्ञातता ज्ञानजन्या ज्ञाततावान् लिङ्गानुमितज्ञानं गृह्यत इति ज्ञाततालिङ्गकानुमितिग्राह्यत्वरूपं स्वतस्त्वमबाधितमतो न प्रामाण्यानु-
मित्यनुरोधेन गुणजन्यत्वसिद्धिरिति चेन्न ॥ तदुक्तप्रामाण्यसंशयात् ॥ घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वादिरूपप्रामाण्यस्य प्रकारकत्वादि-
तं विना प्रथमानुव्यवसायेनासंभवेन मुरारिमतस्य निर्युक्तिकत्वाच्च ॥ एवं भट्टमतमपि न साधु ज्ञाततायां निर्युक्तिकत्वेनासिद्धत्वात् तल्लिंगकानुमित्या प्रामाण्यग्र-
हस्य गुणरूपासिद्धत्वात् ॥ न च ज्ञाततामेवाध्यक्षेण ज्ञाततत्प्रत्यक्षसिद्धा [illegible] प्रत्यक्षज्ञानानन्तरं घटो घटत्वप्रकारकघटविशेष्यकज्ञानविषयः घटत्वसमानाधिकरणः

दौ

९

ए १

तद्न्वयव्यतिरेकसहकारिग्राहकत्वात्तदाह ॥ भीयतेयेनकेनचिदित्यादि ॥ व्यापकस्यापि नित्यस्य निरुक्तहेतुत्वं येनकेनचित् अन्वयव्यतिरेकघटितभिन्नेन
मीयते गृह्यते ॥ तथा च कारणताग्राहकस्य पिनव्यतिरेकानुविधायित्वं किं त्वन्वयानुविधायित्वमेवेति नाप्रसिद्धेहेतुताग्रहासंभवइतिभावः ॥ ननु व्यति
रेकघटितभिन्नधर्मस्य कारणताग्राहकत्वे प्रमाणाभावस्तत्राह ॥ धर्मधीरित्यादि ॥ अन्यथा व्यतिरेकाघटितस्य कारणताग्राहकत्वे आकाशादिरूप
धर्मिसिद्धिर्नस्यादित्यर्थः ॥ अयंभावः ॥ यदि व्यतिरेकाघटितस्य न कारणताग्राहकत्वं किंतु व्यतिरेकघटितस्यैव तत्तर्हि गगनादौ तदभावेन कारणता
ग्रहस[illegible]संभवात् कारणत्वाभावे शब्दः समवायिकारणजन्योभावकार्यत्वादित्यनुमानेन शब्दसमवायिकारणतया गगनादिसिद्धेर्विलोपप्रसंगः
त्तिगगनादिसिद्ध्यन्यथानुपपत्त्या व्यतिरेकाघटितस्यैव कारणताग्राहकत्वमुपेयमिति वस्तुतस्तु व्यतिरेकसहचारस्य कारणताग्राहकत्वपक्षेपि नव्यतिः
कारणतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताककारण[illegible]व्यतिरेकसहचारस्य कारणतावच्छेदकतादात्म्यसंबंधावच्छिन्नप्रतियोगिताकव्यतिरेकस्य भेदरूप
ए १ कारणस्य गगनादेरसंभवत्वेन तत्तत्भावत्वेन व्यतिरेकसहचारग्रहसंभवादितिबोध्यं ॥ नव्यकाशयस्तु व्यतिरेकगर्भकारणत्वपक्षेऽव्यक्तिगगनादीनां तादात्म्येनगगि ए १

॥ पूर्वभावोहि हेतुत्वंमीयतेयेनकेनचित् ॥ व्यापकस्यापि नित्यस्य धर्मिधीरन्यथा नहि ॥ १९ ॥ इत्येषासहकारिशक्तिरसमामा
॥ यांकुरुन्नीतितां मूलतां प्रकृतिः प्रबोधभयतोविघोतियस्याहिना ॥ रेवासौविरतिप्रपंचरचनाकल्लोलकोलाहलः साक्षात्साक्षि
॥ मनस्यविरतं बध्नातु शंतोमम ॥ २० ॥ इतिकुसुमांजलौ प्रथमस्तबकः ॥ २ ॥ श्रीगुरुचरणकमलेभ्यो नमः ॥ श्रीरामाय नमः ॥
तत्तत्संबंधावच्छिन्नप्रतियोगितानवच्छेदकरूपवत्त्व
कारणत्वं पूर्ववर्त्तिकार्यतावच्छेदकसंबंधेन कार्यसंबंधिनिविशेषणतया वर्त्तमानस्याभावस्य कारणतावच्छेदकतत्तत्संबंधावच्छिन्नप्रतियोगितायाः अप्रसिद्धेः कारणतीशरीरेत्वंताभा
स्यकारणताशरीरत्वात् ॥ वस्तुतोनिसामकसंबंधकाभावप्रतियोगितानवच्छेदकतयातादात्म्यसंबंधावच्छिन्नप्रतियोगितायाः अप्रसिद्धेः कारणतानवच्छेदकत्वेपि त
वप्रतियोगित्वस्य प्रवेशेतु सुतरां न तादात्म्येन कारणत्वसंभवतितेन संबंधेनात्यंताभावाप्रसिद्धेरितिनव्यत्यनियामकस्याभावप्रतियोगितानवच्छेदकतत्तत्संबंधावच्छिन्नेति अतोऽत्र
तत्कार्यप्राक्कालावच्छिन्नत्वं तत्कारणतावच्छेदकसंबंधेनप्रयोगित्वंधिकरणत्वमेव निवेशनीयं ननु कारणतावच्छेदकतत्तत्संबंधावच्छिन्नेति प्रतियोगिव्यधिक
त्तिगगनादेस्तादात्म्येन हेतुत्वं सुघटमितिवाच्यं ॥ तथासति कालिकसंबंधेन शब्दादिकं प्रतिकारणत्वंनस्यात् ॥ कालेकालिकसंबंधेन प्रतियोगि
रणाप्रसिद्धेरितिसंक्षेपः ॥ १९ ॥ एवंचमायाविद्याप्रपंचदृष्टपरभृतिनुमाभिकंजगदित्यादिवाक्यविरोधोपीत्याह ॥ इत्येवेति ॥ इत्येवमुक्तलक्षणा
यस्येशस्य सहकारिरूपाशक्तिः ॥ कारणं असमवायि निमित्तं वा ॥ अस्तमलोहेतुमाह ॥ कुरुन्नीतितद्धेति ॥ दुःखेना निरूपयतामित्यर्थः ॥

२

हे१

जं॰सु॰ष्टो॰ व्याख्या तिब्राह्मणं प्रति ब्राह्मणस्यं तु नामांसः गोधकालीन ब्राह्मणो व्यभिचार इति वाच्यं ॥ सर्गाधकालीन ब्राह्मणाव्यावृत्तवैजात्यावच्छिन्नं प्रतिब्राह्मणत्वेन हेतुत्वस्य कल्प
नीयतया नुपपत्तेरभावात् अदृष्टविशेषजन्यतानच्छेदक जातिस्तु सर्वब्राह्मणसाधारणी तस्या इदानीं आरम्भ व्यावृत्तत्वे मानाभावात् नचैवं सति ब्राह्मणं विना
अदृष्टविशेषेण सर्गाधकाले ब्राह्मणोत्पत्तेरिदानीमप्यदृष्टविशेषवलाद्ब्राह्मणं विना ब्राह्मणोत्पत्तिरिति वाच्यं अदृष्टविशेषे पूर्वोजननीयेत थाविधकालवि
शेषब्राह्मणान्यतरस्य सहकारितया नुपपत्त्यभावात् ॥ विजातीय कारणजन्यत्वे वैजात्यं स्यादिति चेन्न ॥ अदृष्टविशेषस्य सजातीयताप्रयोजकस्य सत्त्वे सा
जात्यस्य वारयितुमशक्यत्वादित्यन्यत्र विस्तरः ॥ प्रलयाभ्युपगमे व्यवहारोच्छेदापत्तिरूपवाधकमुक्तम् ॥ मायाच हितिः ॥ घटनयनादिसंपादकस्य सूत्रस
चारितरूपुत्रं प्रति घटमानयेत्यादिनियोगस्य कारणत्वात् मायाविनो मधूत्तरं पुत्रादिकं यदयः तथा सर्गादौ प्रयोज्यप्रयोजकभावापन्नस्थितनानाशरीराधि
ष्ठितात् घटमानयेत्यादिवाक्यनियोजकेश्वरादेवेतरेषां शक्तिग्रहादयः इत्यर्थः ॥ आदिपदात् गदिशिक्षाप्यस्मरः धरस्थे पार्जि
२८ तशरीरं तत्ता भगवतेनेत्यर्थः ॥ २ ॥ ननु वर्षा प्रथमदिनं प्रलयो सिद्धे भव प्रथमदिनं प्रलयासिद्धावसिद्धमित्यतः प्रलयसाधकमाह ॥ जन्मेत्यादि ॥ संप्रदायस्य

जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः ॥ ह्रासदर्शनतो ह्रासः संप्रदायस्य मीयतां ॥ ३ ॥ श्रीरामकृष्णाभ्यां नमः ॥

वेदादिसंप्रदायस्य ह्रासः अत्यंतोच्छेदः मीयतामनुमीयतां वेदादिसंततिरत्यंतमुच्छेद्यते ध्वंसप्रतियोगित्वात् ॥ प्रदीपसंततिवदिति नुमानादिति भावः ॥ अत्र पक्षे
हेतु सिद्धिपरिहाराय प्रमाह ॥ जन्मेत्यादि ॥ तत्र जन्मह्रासः पूर्वमिव मानसीनां अपत्यानां प्रवृत्तमैथुनसंभवानां च प्रजानामभावात् ॥ संस्कारह्रासः पूर्वमिव वर्षप्रभृति पु
त्रयाज्ञेन पुंगभप्रभृति पुंसंस्काराभावात् ॥ यथा कथंचित्पत्योत्पन्नानंतरमेवाधुनिकानां लोकव्यवहारमात्रिसयथा कथंचित्संस्कारकरणात् ॥ विद्याह्रासः प्रागिव सहस्र
शाखस्य षडंगवेदस्याध्ययनाभावात् ॥ केचिदेकस्याः शाखायाः सत्वात् ॥ आदिपदाद्धर्मह्रासो धर्मह्रासस्य तत्र ब्राह्मणापूर्वमेव इदानीं सेवादिः कृतमहति ॥ धर्मह्रा
सस्य पूर्ववत् पादः । ततस्त्रिपाद । ततो द्विपात् इदानीं त्वेकपात् अधर्मादिमलव्याकुल इति क्रमेण वोध्यः शक्तेर्वलरूपायाः ह्रासः भीमादीनामिवास्मदादेरभावात् ॥ बुद्धिरू
पस्य ह्रासः व्यासादीनामिवाभावात् ॥ स्वाध्यायो ध्ययनं तस्य ह्रासः तेषामिवाभावात् । कर्मयागादि तस्य पकर्षः प्राचीनैरिवाधुनिकैरनादरणात् ॥ ३ ॥ द्वितीयस्त
वस्य संग्रह श्लोकमाह ॥ कारं कारमिति ॥ यः परमेश्वरः अलौकिकाद्भुतमयं लोकनिर्माणयोग्यं विलक्षणं जगत् ॥ कारं कारं कृत्वा कृत्वा मायावशगतत्तत्कालसह
कारितो ऽर्थसमवहतो हृष्ट वशगत्सर्गरूपं हारं हारं हृत्वा हृत्वा कुर्वन् क्रीडति ॥ तं देवं निरवग्रहस्तुवदमिध्यानानुभावनिरवग्रहो निःप्रतिबन्धः स्तुवतां पुरुषा राम
णामभिध्यानानुभाव इच्छानुभावइच्छाभावो यस्मात्तं हरं भवजगन्मूलकारणं शिवं प्रतिनमन् नमस्कारं कुर्वन् अंते पुत्रांतकाले भूयासमित्याशंसा ॥ ४ ॥ ६

वा॰५८

घटत्वप्रकारक ज्ञानतावत्त्वादित्यनुमानात् आभारणग्रहः इत्यपि वाच्यं ।। ज्ञाते घट इति ज्ञानस्य तत्त्वेन विषयत्वे नैवोपपत्तेर्ज्ञानतावत् ऽर्थत्वसाधकत्वात् ।। अन्यथा घट इत्यादि प्रतीतिवि
षयत्वेनेष्टत्वाज्ञाति रिक्तपदार्थस्यापि सिद्ध्यापत्तेरित्याद्यन्यत्र विस्तरः ।। स्फोटेति ।। आभारणपार्थस्तु प्रमाया गुरुजन्यत्वानुमानतः कथं वर्णानां नित्यतया वर्णसमूहरूपवेद
स्यापि नित्यत्वमिति तन्निरोधे वेदजन्यत्वे नैव शाब्दबोधप्रमायाः आभारणग्रहसंभवात् ।। तस्मादत्र मीम्परेनेति चेन्न ।। उत्पन्नो गकारो विनष्टो गकार इत्यादि प्रतीतीनां विनाग
कारादेस्तत्त्वतिभिन्नानाशस्वीकारमनुपपन्नतयानेषां तथा विधानित्यत्वस्वीकारस्यावश्यकत्वात् ।। न च ताद्दशप्रतीतीनां परंपरासंबंधेन वायुसंयोगोत्पत्त्यादिविषयकत्वे ने
वोपपत्तौ वर्णनित्यत्वाभ्युपगमो व्यर्थोतः एव सोयं गकार इति प्रत्यभिज्ञायाः स्वारसिकप्रामाण्यमपीति वाच्यं ।। गकारादिप्रत्यक्षत्वस्य वायुसंयोगकार्यतावच्छेदकत्वा
पेक्षया गत्वादेरेव वायुसंयोगकार्यतावच्छेदकत्वे लाघवात् प्रत्यभिज्ञात् सजात्यावलंबनानानाभेदार्थत्वस्यत्र विस्तरः ।।१।। ननु सति प्रलये उच्चरितत्वेश्वरः सिध्यति ।। स एव 12
नुनासिप्रमाणाभावात् तत्स्वीकारे होराज भव्यवहितोत्तरो होरात्रपूर्वकमिति भंगापत्तेः सर्गादिमाहोरात्रेतत्त्वाधात् ।। आहत्य ज्ञानजन्यत्वे सति ब्राह्मणीजन्यस्यैव ब्राह्मण
जन्यत्वाभ्युपगमेन सर्गाघकाले समुत्पन्नस्य तज्जन्यत्वाभावेन ब्राह्मणत्वाभावात् ।। इदानीं तनानां सुतरां तज्जन्यत्वाभावसंभवात् ।। एवं शाब्दव्यवहारविलोपा

वर्णादिवद्भवोपाधिर्वत्तिरोधः सुषुप्तिवत् ।। उद्भिज्जवृश्चिकवद्वर्णाभावस्तस्मयाद्यः ।।२।। श्रीगुरुभ्यो नमः ।।

पतिश्च प्रयोज्यप्रयोजकवृद्धयोरभावेन संकेतग्राहकप्रयोज्यवृद्धप्रयोजकवृद्धस्य व्यवहाराभावात् घटादिनि र्माणाने पुरुषस्य पूर्वपूर्वत दर्शनसापेक्षस्य सर्गा
घकाले संभवेन घटस्यैव प्रसंगो वाच्छेदक प्रसंगात् चेत्सत्रआह ।। वर्णादिवदिति ।। यद्दहोरात्रं तदव्यवहितोत्तरपूर्वकमिति न व्याप्तिः ।। सहचारदर्शनमात्रेण व्याप्तिस्वी
कारे वर्णादिनमव्यवहितवर्णादिनपूर्वकमित्यादिव्याप्त्यापि प्रसंगादित्यतत्राह ।। वर्णादिवदिति तत्र कर्कसिंहान्यतरावस्थितत्वनिसंक्रमसंबंधपूर्वकत्वमुपाधि
रतोन तथा व्याप्तिरिति चेत्तर्हि प्रकृतेपि तुल्यं अहोरात्रत्वेनाव्यवहिताहोरात्रपूर्वकत्वे मा ध्ये प्रवहितसंसारपूर्वकत्वरूपोपाधेः सत्त्वादित्यत्राह ।। भवोपाधिरिति
तथा चोपाधिसत्त्वान्न तथा विधानुमानादहोरात्रं अव्यवहिताहोरात्रपूर्वकत्वं साधयितुं शक्यमित्ति भावः ।। कालस्य भोगव्याप्यत्वं दूषयति ।। वृत्तिरोध इति ।। वृत्ति
रोधः अदृष्टरोधः सुषुप्तिवत् सुषुप्तिकालवत् ।। तथा च सुषुप्तिकाले यथा कतिपयादृष्टानां निरोधः तथा कदाचित् समस्तादृष्टनिरोधोपि संभवतीति ।। तथा विधा
नुमानप्रयोजकमिति भावः ।। इदानीं तनानां ब्राह्मणत्वाभावप्रसंगं इति बाधकं निरस्यति ।। उद्भिदिति ।। यथा उद्भिदाख्यः शाकविशेषस्तंदुलकणेभ्यस्तथा विध
शाकविशेषबीजेभ्यश्चोत्पद्यते ।। गोमयाद्वृश्चिकोत्पत्तिः तथा सर्गाघकाले केवलादृष्टविशेषात् इदानीं च ब्राह्मणाद्ब्राह्मणस्योत्पत्तिरित्यर्थः ।। नचेवंस

दि४६

हेतरुx२

न्योन्याभावप्रतियोगित्वव्याप्तेः तत्प्रतियोगितावच्छेदके वातिव्याप्तेः अन्योन्याभावाभावस्य तत्प्रतियोगितावच्छेदकस्वरूपत्वादिति चेन्न॰ प्रतियोगित्वपदेन संसर्गाभावप्रतियोगित्व
स्य विवक्षितत्वात्॰ केचित्तु॰ अभावबुद्धिं प्रति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य हेतुत्वादीश्वरज्ञानं विना ईश्वराभावज्ञानासंभवात्तदुपपत्त्यर्थमीश्वरज्ञा
नमवश्यं स्वीकार्यमिति पारमार्थिकस्येश्वरस्यावश्यकता॰ अन्यथा तज्ज्ञानासंभवात्॰ नचासत्ख्यातिमते ईश्वरज्ञानादेव तदभावबुद्धिर्भविष्यतीति वाच्यं॰ असत्
ख्यातेरनंगीकारेण असत्ख्यातिसामग्र्या असत्त्वस्यैवोपस्थितत्वात् असंभवादित्याहुः॥२॥ योग्यानुपलब्धिर्न योग्यस्यानुपलब्धिः जलपरमाणौ पृथिवीत्वाभावस्य ह
प्रत्यक्षत्वापत्तेः॰ नापि योग्येऽनुपलब्धिः स्तम्भे पिशाचाभावप्रसंगात्॰ अपितु योग्या चासावनुपलब्धिश्चेति॰ अनुपलब्धौ योग्यता च प्रतियोगितद्व्याप्येतरप्रतियोगिग्राहकयो
वत्समवधानं॰ नचैवं योग्यता शशशृङ्गाभावस्य हेतुर्भवति॰ शशशृङ्गोपलंभसामग्री हि दुष्टादोषघटिता तस्यां सत्यां कथं शशशृंगानुपलंभः अनुपलंभे च सति तादृशो
पलंभसामग्र्येव नास्तीति कथं योग्यतेत्याह दुष्टोपलंभेचेति॰ शशशृंगादियोग्यता शशशृंगादिस्थलेऽनुपलब्धियोग्यता दुष्टादोषघटितातदुपलंभसा

दुष्टोपलंभसामग्री शशशृंगादियोग्यता॥ न तस्यां नोपलंभोऽस्ति नास्ति साऽनुपलंभने॥३॥ इष्टसिद्धिः प्रसिद्धे हेत्वसिद्धिरगोचरे॥ नान्या
सामान्यतः सिद्धिर्जातावपि तथैव सा॥४॥ श्रीः॥

मग्री शशशृंगोपलंभस्याप्रमात्वेन तज्जनकसामग्र्या दोषघटितत्वनियमात्॰ प्रतियोगिग्राहकस्यैवोक्तयोग्यतात्वनिर्वचनात्॰ तस्यां सत्यां नोपलंभः
उपलंभाभाव इति नास्ति अनुपलंभने अनुपलब्धौ सा पूर्वोक्ता[illegible] योग्यतैव नास्तीत्यर्थः तथा च यदा तादृशसामग्री तदा न प्रतियोग्युपलंभाभावः यदि
तु न तादृशसामग्री तदा न निरुक्तयोग्यानुपलब्धिरिति न यथा शशशृंगाभावसिद्धिस्तथा निरुक्तयोग्यानुपलब्धिविरहादीश्वराभावोऽपि न सिध्यतीति
भावः॥३॥ ननु तथाप्यात्मानो न सर्वज्ञाः न सर्वकर्तारश्चेतनत्वादस्मदादिवदित्यनुमानादीश्वरे सर्वज्ञत्वाद्यभावसिद्धौ फलतः पारमार्थिकेश्वराभाव
सिद्धिरित्यत आह इष्टसिद्धिरिति॰ प्रसिद्धे प्रसिद्धे आत्मनि येनात्मत्वादिना तिथावत् उपदर्शितानुमाने न पक्षीकृते इति शेषः इष्टसिद्धिः सिद्धसाधनम्॥
ननु भगवानेव पक्षः स्यात आह हेत्वसिद्धिरित्यादि॰ अगोचरे अज्ञाते ईश्वरात्मनि॰ हेत्वसिद्धिर्हेतोरज्ञानमित्यर्थः। तथा च तस्याज्ञानेन तद्वृत्तिहेतुज्ञानासंभ
वान्नानुमानसंभवतीति भावः नन्वात्मत्वेन सामान्यतः सिद्धिर्भविष्यतीत्यत आह नान्येति॰ सामान्यतः आत्मत्वेन रूपेण अन्या ईश्वरात्मविषयिणी सिद्धिरपि नेत्यर्थः तेन रूपेणापि
तुल्यग्राहकसामग्र्यभावादिति भावः नन्वात्मत्वं न सर्वज्ञवृत्ति जातित्वात् गोत्वादिवदित्यनुमानादात्मत्वे सर्वज्ञादिवृत्तित्वाभावे सिद्धे फलतः पारमार्थिकेश्वराभावसिद्धिरित्यत आ
ह जातावपीति॰ आत्मत्वजातौ सर्वज्ञवृत्तित्वाभावे साध्येऽपि तथैव पूर्ववदेव साऽसिद्धिरित्यर्थः अयं भावः आत्मत्वजातौ सर्वज्ञवृत्तित्वाभावे साध्ये सर्वज्ञाप्रसिद्ध्या तद्वृ

॥ इति द्वितीयस्तवकव्याख्या समाप्ता ॥ ॥ नन्वनुपलब्धिरूपबाधकसत्त्वात् कथमीश्वरसिद्धिः यद्येवं द्व्यणुकपदार्थसिद्धावेवानुपलब्धिर्बाधिका न स्यात्तीदिमे असिद्धा विति
विभाव्यते तदातीन्द्रियशशशृङ्गाभावस्याप्यसिद्ध्यापत्तिः ॥ यदि च योग्यानुपलब्ध्या शशशृङ्गे गोः भावेन सिद्धिरिति अपि तु साधकाभावाच्छशशृङ्गादेरभावः ॥ अत्र तु वस्तुमात्रेश्वरसाध
कानुमानस्य जागरूकत्वादित्यत्र उच्यते ॥ तदीश्वरस्यैव योग्यसाधनतानामनयोग्याघभावेन कर्तृत्वाभावसिद्ध्या कर्तृत्वस्यापि शशशृङ्गतुल्यापत्तेरित्याशङ्क्यानुपलब्धिमात्रस्याभा
वसाधकत्वे इति प्रसङ्गात् ॥ योग्यानुपलब्धिरेवाभावसाधिकाभ्युपेया सा चेश्वरे न सम्भवतीत्यभिप्रेत्याह ॥ योग्या दृष्टिरिति ॥ योग्यादृष्टिर्योग्यपुरुषमीश्वरे कुतः न यावदीश्वरे पलम्भा
प्रतिसिद्ध्या प्रतियोगित्वाप्येतरप्रतियोग्युपलम्भकसावशेषसामग्री विशिष्टप्रतियोग्युपलम्भाभावात्मिकाया योग्यानुपलब्धेरीश्वराभावग्राहिकाया अप्रसिद्धेरीश्व
रेऽयोग्यानुपलब्धिर्बाधिकेति भावः ॥ यद्यतीन्द्रियप्रतियोगिकाभावसिद्धिस्तदा योग्यशशशृङ्गाभावसिद्धिरपि मास्त्विति प्रतिबन्दिसमाधानमाह ॥ यदीति ॥ यतः
योग्यं शशशृङ्गं बाध्यते अयोग्यं शशशृङ्गं न बाध्यते ॥ किन्तु योग्यानुपलब्धिवशात् शशोरत्यन्तशृङ्गाभावः सिद्ध्यतीत्यतः प्रतिबन्दिः कुतस्तराम् ॥ अतीन्द्रियशशशृङ्गाभावाद्विना सि
द्ध्यादिति प्रतिबन्दिः सुलभा नास्तीत्यर्थः ॥ तथाप्युपदर्शितरीत्येश्वरे कर्तृत्वाभावसाधनेन स्वयं पारमार्थिकेश्वरसिद्धिरित्याशयेनाह ॥ क्वानुमानमिति ॥ तस्यासिद्धोऽस्वीमेव सा

कारं कारमलौकिकाद्भुतमयं मायावशात्संहरन् हारं हारमपीन्द्रजालमिव यः कुर्वन् जगत् क्रीडति ॥ तं देवं निरवग्रहस्फुरदभिध्या
नानुभावं भवं विश्वासैकभुवं शिवं प्रतिनमन् भूयासमन्तेष्वपि ॥ ४ ॥ इति द्वितीयस्तबकः समाप्तः ॥ २ ॥ योग्यादृष्टिः कुतोऽयोग्ये प्रतिबं
दिः कुतस्तराम् ॥ क्वायोग्यं बाध्यते शृङ्गं क्वानुमानमनाश्रयम् ॥ १ ॥ यावर्त्या भाववत्तैव भाविकी हि विशेष्यता ॥ अभावविरहात्म
त्वं वस्तुनः प्रतियोगिता ॥ २ ॥

धनताज्ञानाभावशरीराद्यभावहेतुकं कर्तृत्वाभावानुमानं न सम्भवति आश्रयासिद्धेः ॥ न हि पक्षज्ञानं विनानुमितिः केनाप्यभ्युपेयते पक्षज्ञानस्यापि हेतुत्वात् ॥ सि
द्धेऽनु धर्मिग्राहकप्रमाणबाध इति भावः ॥ १ ॥ विकल्पस्य व्याख्यापरमेश्वरस्य पक्षज्ञानसम्भवादित्यत आह यावर्त्येति ॥ यावर्त्य कर्तृत्वं तदभाववत्तैव भाविकी पारमा
र्थिकी विशेष्यता ईश्वरे आश्रयत इति कारिकापूर्वार्द्धार्थः ॥ अयं भावः उपदर्शितरीत्या ईश्वरे कर्तृत्वाभावसाधने कर्तृत्वाभावेनैवेश्वरस्य पारमार्थिकत्वं ॥ अन्यथास
स्वतोः सम्बन्धाभावेन पारमार्थिककर्तृत्वाभावस्यापारमार्थिकेश्वरे सम्बन्धाभावेन तत्तत्साधनासम्भवात् ॥ न चालीककर्तृत्वाभाव एव साध्यत इति वाच्यं ॥ अलीककर्तृता
भावसिद्धेः पारमार्थिकेश्वराभावसिद्धौ विरोधितया तथाविधसिद्धेरनुद्देश्यत्वादिति ॥ अथ ईश्वरे कर्तृत्वाभावो न साध्यते अपि त्वनुपपत्त्यादिवशादीश्वराभाव
एव साध्यते तथा च पारमार्थिकेश्वरसिद्धिरित्यत आह अभावेति ॥ वस्तुनः वस्तुन एव तथा चेश्वराभावसिद्धौ ईश्वरे अभावप्रतियोगित्वमपि सिध्यति तत्राभा
वात्मकत्वस्वरूपं वस्तुन एवेति ईश्वराभावसिद्धावपीश्वरस्य पारमार्थिकत्वमप्यूहनीयमेवेति भावः ॥ ननु कथं प्रतियोगित्वमभावाभावात्मकत्वरूपं

त्तिनिश्चयस्यापि तर्कप्रयोज्यत्वेनानवस्थापत्तिरित्यत आह व्याघातावधिराशंकेति॰ व्याघातः धूमादिविशेष्यकवह्न्याद्यन्वयव्यतिरेकानुविधायित्व[illegible]ज्ञानव्यभिचारशंकाका
रणाभावादिप्रयुक्तस्तर्कविघटकशंकाविरहस्तत्र तर्कापूर्वतर्कस्यानपेक्षितया नोपदर्शितानवस्थेति भावः॥ तर्कश्चाहार्यारोपविशेषः सूत्रितो महर्षिणा गोतमेन॥
अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्क इति॰ अत्र तर्क इति लक्ष्यनिर्देशः सच तर्केण तर्क इति व्युत्पत्त्या प्रसंग एव तल्लक्षणं कारणोपपत्तित इति॰
कारणं व्याप्यं तस्योपपत्तितः आहार्यारोपस्ततस्तेन ऊहः व्यापकस्याहार्यारोपः आहार्यव्याप्यारोपेणाहार्यव्यापकारोप[illegible] इति यावत्॰ यथा ह्रदो यदि वह्निव्याप्यधू
मवान् स्यात् वह्निमान् स्यादिति॰ धूमारोपेण वह्न्यारोपः फलमाह तत्त्वज्ञानार्थमिति॰ व्याप्तिनिश्चयार्थं विषयपरिशोधार्थं चेत्यर्थः कारणमाह अविज्ञाततत्त्वेऽर्थे इ
ति॰ न विज्ञातं विशेषतोऽज्ञातं तत्त्वं वास्तवरूपं यस्य तस्मिन्नर्थे य ऊहः स तर्क इति भावः तथा च यत्र भूयोदर्शनादिनापि शंकापिशाची न गच्छति तत्रोहः कार्य इ
त्युक्त्या सामान्यतोऽज्ञानं संशयश्च तर्कहेतुरिति लब्धं॰ लक्षणं वास्य लक्षणवाक्येन लब्धं॰ व्याप्यारोपत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयज्ञानत्वम्॰ 15

व्याघातावधिराशंका तर्कः शंकावधिर्मतः॥७॥ श्रीविरजानंदाय नमः॥

तर्कयामीति प्रतीतिसिद्धा तर्कत्वजातिर्वा॥ स चायं तर्कः पंचविधः आत्माश्रयान्योन्याश्रयचक्रकानवस्थेतदन्यतमबाधितार्थप्रसंगभेदात्॰ तत्र स्वस्य स्वापेक्षापा
दनिष्टप्रसंग आत्माश्रयः यथायं घटः एतद्घटजन्यः स्यात् एतद्घटानधिकरणक्षणोत्तरवर्ती न स्यादिति॰ स्वापेक्षापेक्षितत्वनिबंधनः स्वस्यानिष्टप्रसं
गोऽन्योन्याश्रयः यथायं घटः एतद्घट[illegible]जन्यजन्यः स्यात् एतद्घटभिन्नः स्यादिति॰ स्वापेक्षापेक्षितापेक्षितत्वनिबंधनश्चक्रकं॰ यथायं घटः एतद्घटजन्यजन्यजन्यः
स्यात् एतद्घटभिन्नः स्यादिति॰ आपत्तिप्रयोजकीभूतरूपवदापाद्यापादनानवस्था॰ यथा घटत्वं यदि घटजन्यत्वव्याप्यं स्यात् कपालसमवेतत्वव्याप्यं न स्यादिति॰
एतद्भिन्नस्त्वन्यप्रसंगः पंचमः सोयं द्वेधा॰ व्याप्तिग्राहको विषयपरिशोधकश्च॰ तत्राद्यो व्याप्तिग्रहविरोधिव्यभिचारशंकानिवर्तकः यथा धूमो यदि वह्निव्यभिचा
री स्यात् वह्निजन्यो न स्यादिति॰ न चान्वयव्यतिरेकनिर्णयं विना कथमेतादृशतर्कावतार इति वाच्यं॰ धूमो यदि वह्निसमवहितजन्यत्वे सति वह्निसमवहितजन्यो
न स्यात् जन्यो न स्यादित्याकारकतर्कात् धूमो वह्निसमवहितजन्यो न वेत्याकारकाहार्यशंकानिवृत्तौ बाधाभावहेतुकापादकाभावसाधकानुमानानन्तया
विधान्वयव्यतिरेकनिर्णयसंभवात्॰ अत्र तर्कस्याहार्यशंकानिवर्तकत्वमेव॰ तर्ककारणीभूतव्याप्तिज्ञानेनैवानाहार्यव्यभिचारशंकानिरासात्॰ वह्निजन्यत्वाभा
वो वह्निव्यभिचारित्वव्यापक इति ज्ञाने सति वह्निजन्यत्वाभाववान् यदि स्यात् तदान्वयव्यतिरेकज्ञाने सति तथाविधानाहार्यशंकाया असंभवात्॰ वह्निव्यभिचारित्वं वह्निज

ननु भवद्भिरभिमतागमादिभिरीश्वरसाधनं संपाद्य तत्रासर्वज्ञत्वादिकं साधनीयमित्यत आह आगमादेरिति। आगमादेर्यदि प्रामाण्यं तर्हि बाधनादेरीश्वरपक्षकसर्वज्ञत्वाद्यभावसाधकानुमानादेर्निषेधनं ना
वतारः आगमादेव सर्वज्ञत्वादिविशिष्टेश्वरसिद्ध्या तदनुमानेऽबाधावतारादिति भावः। आभासत्वे आगमादेरप्रामाण्ये सा पूर्वोक्ता आश्रयासिद्धिरुक्तैव दुरुद्धरैवेत्यर्थः। तत आभासप्रतिपन्ने
सर्वज्ञत्वाद्यभावः साधनत इत्यत्रानुव्यावर्त्याभाववत्त्वेनेति कारिकोक्तरूपो योऽस्य इति भावः॥ ॥ न चातीन्द्रियपदार्थानभ्युपगन्तॄणां चार्वाकाणां मते अतीन्द्रियपदार्थविलोपप्रसंगरूपबाधकासंभवेना
नुपलब्धिमात्रादेवेश्वराभावसिद्धिः स्यादित्यत आह दृश्यादृश्ययोरिति। दृश्यादृश्ययोस्तद्दर्शनतद्दर्शनाभावान्यतरयोः सतोरपि भावाभावविनिश्चयात्। तत्र तदभावा न्यतरनिश्चयात्।
क्व संदेहः संदेहो न भवतीति कारिकापूर्वार्द्धार्थः। अयं भावः चार्वाकमते यद्यनुपलब्धिबलादेवाभावविनिश्चयस्तदाऽनुमानाप्रामाण्यमभ्युपगन्तॄणां चार्वाकाणां बहुशो उत्कटकोटिक
संभावनातो वह्निव्यवहार इति मतमनुपपन्नं स्यात्। उपदर्शितयुक्त्या वह्निवह्न्यभावयोरन्यतरनिश्चयेन वह्निसंदेहासंभवादिति। अनुपलब्धेरभावनिश्चायकत्वे दूषणान्तरमप्या 16
ह अदृष्टिबाधित इति। अदृष्टिबाधिते केषांचिदनुपलब्ध्या निश्चिताभावके हेतौ प्रत्यक्षमपि दुर्लभं स्यात्। प्रत्यक्षप्रमाणमपि दुर्लभं स्यादित्यर्थः। गोलकादर्शनेन गोलकाभाव

आगमादेः प्रमाणत्वे बाधनादिनिषेधनं॥ आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धता॥५॥ दृश्यादृश्योः क्व संदेहो भावाभाव
विनिश्चयात्॥ अदृष्टिबाधिते हेतौ प्रत्यक्षमपि दुर्लभं॥६॥ शंका चेदनुमास्त्येव न चेच्छंका ततस्तरां॥ शिवोम्॥

सिद्ध्या प्रत्यक्षप्रमाणमपि व्याहन्येतेति भावः। न चोपलब्धिविशेषाभावो नाभावसाधकः किंतूपलब्धिसामान्याभाव एव साधकस्तथा च चार्वाकीयगोलकात्मकेन्द्रियादेः केषांचिदुप
लब्ध्या नोक्तरीत्या तदभावसिद्धिरिति प्रत्यक्षप्रमितिकरणबाधेन नानुपपत्तिरिति वाच्यं। तथा सति घटवति भूतले घटापसारणानंतरं तदभावप्रत्यक्षानुदयप्रसंगात्। भूतले प
टस्य विद्यमानतादशायामुपलब्धिसत्त्वेन तत्रोपलब्धिसामान्याभावासत्त्वात्। तस्मादनुपलब्धिर्नाभावसाधिका किंतु योग्यानुपलब्धिरेव। सा च प्रकृते नास्तीति नेश्वराभावसि
द्धिरित्यादि स्वयमूह्यं। एतेन सांख्यमीमांसकावपि निरस्तौ वेदितव्यौ योग्यानुपलब्धेरभावेनेश्वराभावासिद्धेरित्यास्तां विस्तरः॥६॥ नन्वनुपलब्धिमात्रस्याभावासाधकत्वेऽपि सर्वत्रा
तीन्द्रियोपाधिसंदेहेन व्यभिचारसंदेहात् व्याप्तिनिश्चयो दुर्लभः स्यात्तथा चानुमानप्रमाणसिद्धिर्न तत ईश्वरसिद्धिरित्याशंकामपाकर्तुमाह शंका चेदिति। व्याप्तिनिश्चये प्रति
बंधकीभूतो व्यभिचारसंशयः यदि कालान्तरीयदेशान्तरीयधूमे एवोत्थाप्यते तदा अनुमास्त्येव अनुमानप्रमाणमावश्यकमेव। अन्यथा कालान्तरीयदेशान्तरीयधूमोपस्थितेरसंभवेन
सं धर्मिज्ञानाभावात्तत्प्राप्तिविषयसंशयाभावात्। यदि च न कालान्तरीयदेशान्तरीयसंदेहस्तदोपलभ्यमानधूमे वह्निसामानाधिकरण्यनिश्चयात्। व्यभिचारसंदेहासंभवेन तरां सुतरां
मनुमानप्रमाणमावश्यकमेवेति कारिकापूर्वार्द्धार्थः। न नूपलभ्यमानधूम एव धूमत्वेन व्यभिचारसंशयः संभवति। तत्प्रतिबंधकस्य धूमत्वावच्छेदेन व्यभिचारनिश्चयस्या
सत्त्वात्। तथा व्याप्तिनिश्चयासंभवेन कथमनुमानं प्रमाणं तत्राह तर्कः शंकावधिर्मत इति। तथाविधव्यभिचारसंशयप्रतिबंधक इत्यर्थः। नन्वेवं सति तर्कमूलीभूतव्या

॥१३॥ निर्देशवाक्यघटकीभूतपदलिंगितसदृशलक्षणयोपस्थितेर्गवयत्वविशिष्टे तथाविधातिदेशवाक्यादेव तथाविधशक्तिग्रहसंभवे किमुपमानेनेत्यत आह ख्यातान्वयादिति। ख्यातान्वया
त्तु प्रदर्शितातिदेशवाक्यघटकपदशक्यार्थान्वयबोधजनकत्वात् अनाकांक्षितास्वजनितान्वयबोधत्वेन निराकांक्षमतिदेशवाक्यं नान्यदिष्यते इति। तथा च गवयत्वविशि
ष्टे स्वघटकपदलक्षणया गोसादृश्योपलक्षितगवयत्वविशिष्टविशेष्यकं गवयपदवाच्यत्वविषयमुत्पादयितुं शक्नोतीति निराकांक्षार्थः। तद्वाक्यजन्य[illegible]शाब्दधियं
प्रति तद्वाक्यजन्यशाब्दबोधस्योत्तेजकाभाववैशिष्ट्यस्य प्रतिबंधकत्वादिति भावः॥ ननु प्रथमत एव तथाविधातिदेशवाक्याद्गवयो गवयपद[illegible]वाच्य इत्य[illegible]न्वयबोधे
किं बाधकमित्यत आह पदार्थान्वयवैधुर्यादिति। पदार्थान्वयवैधुर्ये एकपदार्थेऽपरपदार्थान्वयानुपपत्तिर्यत्र तत्राक्षिप्तेन लक्षणीयेन संगतिः शाब्दबोध इत्य
र्थः। अयं भावः। यत्रान्वयानुपपत्तिस्तत्रैव लक्षणीयार्थस्य शाब्दबोधे भासमानत्वं प्रकृते तदभावेनातिदेशवाक्याद्गवयो गवयपदवाच्य इत्याकारकशाब्दबोधासंभवेनान्व
यानुपपत्त्या गवयो गवयपदवाच्य इत्याकारकविलक्षणप्रमितिमुपेत्य तत्करणत्वेनातिदेशवाक्यार्थज्ञानं गोसादृश्यविशिष्टपिंडदर्शनं वोपमानाख्य[illegible]प्रमाण

ख्यातान्वयादनाकांक्षं न वाक्यं ह्यन्यदिष्यते। पदार्थान्वयवैधुर्यात्तदाक्षिप्तेन संगतिः॥१२॥
अनैकांतः परिच्छेदे संभवे च न निश्चयः॥ आकांक्षासत्तयाहेतुर्योग्यासत्तिरबंधना॥१३॥

मतिरिक्तमवश्यमुपेयमित्यलमतिविस्तरः॥१२॥ ननु भवतु उपमानमतिरिक्तं प्रमाणं शाब्दस्त्वनुमाने एवांतर्भवति। तथा हि। शब्दश्रवणानंतरं ज्ञातपदार्थस्म
रणः श्रोताऽनुमिनोति। एते पदार्थास्तात्पर्यविषयमिथःसंसर्गवंतः आकांक्षायोग्यतासंनिधिमत्पदस्मारितत्वात्। गाममानयेति पदार्थवत्। अत्र तात्पर्यवि
षयेति कथनात् अनभिमतसंसर्गसिद्ध्यर्थांतरं। एतानि पदानि एतानि पदानि तात्पर्यविषयस्मारितपदार्थसंसर्गप्रमापूर्वकानि। आकांक्षादिमत्पदकदंबत्वात्।
संमतवत्। न च द्वितीयानुमाने प्रमापूर्वकत्वसिद्धावपि कथं संसर्गसिद्धिरिति वाच्यं। तद्विशेषणतया तस्यापि साध्यकुक्षिनिक्षेपात्। ननु यावदनुमितेर्व्या
पकतावच्छेदकनियमास्मारितपदार्थत्वेनैव रजतादिसिद्धौ रननुरजनत्वादिप्रमेयत्वादिना तादृशज्ञानस्याप्रवर्तकतया रजतत्वादिप्रकारकज्ञानस्यैव प्रवर्तक
त्वादिति चेन्न। पूर्वं रजतत्वादि[illegible]नारजतादेरुपस्थितत्वादितरबाध[illegible]वत्वादिना रूपेणानुमितौ भानसंभवात्। अत एव सकर्तृकत्वानुमाने लाघवोपनी
तमेकत्वादिकमपि भासते लाघवज्ञाने तत्र व्याप्त्यतिरिक्तस्य स्वरूपस्य व्यापकतावच्छेदकभानानभ्युपगमादिति वदंतीत्यत आह अनैकांत इति। परिच्छेदे। परि शिव.
॥१३॥

मानाख्यातिरिक्तप्रमाणांगीकारे साधर्म्यविवक्ष विगवयसादृश्यग्राहकोपमानाख्यप्रमाणमिव वैधर्म्यग्राहकं मानं एवं प्रमाणान्तरं प्रसज्यते प्रसक्तं भवति असौ घटादौ गोवैध
र्म्यग्राहकं प्रमाणं· अर्थापत्तिर्गवि घटादि वैधर्म्यं घटे गोवैधर्म्यं विनाऽनुपपन्नमित्याकारं व्यतिरेकव्याप्तिज्ञानविधयाऽनुमानं युक्तं यदि तदसाधारणं न किं गवि
गवयसादृश्यज्ञान[redacted]जनकमपि गवये गोसादृश्यं विना गवि गवयसादृश्यमनुपपन्नमित्याद्यनुपपत्तिज्ञानं व्यतिरेकव्याप्तिज्ञानविधयाऽनुमानमेव किं न स्यादि
तिसंपूर्णकारिकार्थः नन्वगवयनिष्ठगोसादृश्यपरस्परसाहचर्यनियतपाकत्वंत लिंगत्वमिति वाच्यं· प्रतियोगितासंबंधेन व्याप्यतासंबंधेनाभ्युपगमेनादोषादि
तिस्वपक्षेऽयं·नत्वावोपदर्शितसादृश्यज्ञानस्य प्रकारांतरेणोपपत्तावेनजन्यमेवोपमानं प्रमाणमिति पक्षोपाहरणीयमिति भावः॥ न चैवं सत्युपमानाख्यप्रमाणाभ्युपगमोऽव्यर्थस्ता
द्गृहसंबंधस्येति· संज्ञायाः गवयादिनाम्नः संज्ञिना गवयादिना सह संबंधस्य शक्तेः परिच्छेदो ज्ञानं उपमानफलं विदुः उपमानाख्यातिरिक्तप्रमाण[redacted]फलं विदुः गौतमा ॥ ९॥
दय इति शेषः नन्वहेतुः प्रत्यक्षादेरसाध्यत्वात् प्रत्यक्षप्रमाणादिनाऽनुपपन्नमिति संपूर्णकारिकार्थः अयं भावः विशिष्याज्ञातगवयपदशक्तिकस्य कीदृशो गवयपदवाच्य इति 18

साधर्म्यमिव वैधर्म्यमानमेवं प्रसज्यते॥ अर्थापत्तिरसौ युक्तमिति साधारणं न किं॥ १९॥ संबंधस्य परिच्छेदः संज्ञायाः संज्ञिना सह॥ प्रत्यक्षादेर
साध्यत्वादुपमानफलं विदुः॥ २०॥ सादृश्यस्य निमित्त[redacted]वाभिन्ननिमित्तस्य प्रतीतितः॥ समयो दुर्ग्रहः पूर्वं शब्देनानुमयापि वा॥ २१॥ श्रीरस्तु·

प्रश्नानंतरं प्रयोजकवृद्धेन गवयपदवाच्य इति वाक्ये प्रयुक्ते गोसदृशो गवयपदवाच्य इति शाब्दप्रबोधानंतरं तज्जनितसंस्कारेण गोसादृश्यविशिष्टगवयात्मकपिंडदर्शनसहकृतेन ज्ञ
निनाऽसौ सदृशो गवयपदवाच्य इति स्मरणात् दृष्टं गवयो गवयपदवाच्य इति पदशक्तिज्ञानं न प्रत्यक्षेणासंभवति· गवयत्वविशिष्टात्रैसंनिकर्षादेरभावादिति तज्जनकत
योपमानाख्यमतिरिक्तप्रमाणमवश्यमेष्टव्यमिति॥ २०॥ ननूपमानप्रमाणं विनापि गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यात् गवयो गवयपदवाच्यो गोसदृशत्वादित्याद्यनु
मानात् गवयपदप्रवृत्तिनिमित्तविशिष्टे शक्तिग्रहसंभवात् किमुपमानाख्यातिरिक्तप्रमाणेनेत्यत आह सादृश्यस्येति· गौरवेण गोसादृश्यस्य प्रवृत्तिनिमित्तत्वासंभवा
द्भिन्ननिमित्तस्य प्रतीतितः साधवाऽऽगवयपदप्रवृत्तिनिमित्तत्वेन जात्युपस्थापकस्यानुपस्थितेः पूर्वं· गोसदृशपिंडदर्शनात्पूर्वं शब्देनानुपदर्शितातिदेशवाक्येन अनुमया
विनागवयपदवाच्यो गोसदृशत्वादित्यनुमानेन वा समयो दुर्ग्रहः गवयपदप्रवृत्तिनिमित्तविशिष्टे गवयपदशक्तिग्रहोऽश[redacted]क्य इति संपूर्णकारिकार्थः शाब्दबोधे पदजन्यप
दार्थोपस्थितेरनुमितौ पक्षतावच्छेदकविशिष्टपक्षज्ञानस्य हेतुतया विना गवयोपस्थितिं तथाविधातिदेशवाक्यात्तथाविधानुमानात् गवयो गवयपदवाच्यो इ
तिशक्तिग्रहासंभवेन तदुप[redacted]पत्त्यर्थमतिरिक्तोपमानप्रमाणमवश्यमंगीकार्यमिति भावः॥ २१॥ ननु प्रत्यक्षेण गवयत्वविशिष्टज्ञानानंतरमेव तथाविधा

एवं चमतेनु अनुमितिसामग्रीप्रतिबंधकतयैवोपपत्तिरिति चेत् न। अननुमितमप्यसाताकृतं कृतमिदं नैयायिकेन इत्यादिकप्रामाणिकप्रत्ययेनानु-
मितित्वाद्यभावनिश्चयेन शाब्दत्वोविलक्षणप्रमित्यंतरस्वीकारेऽस्यावश्यकत्वात् तत्करणस्य प्रमाणांतरमावश्यकमेवेत्यायन्यत्र विस्तरः॥१३॥
लौकिकवाक्यप्रयोगानंतरं श्रोताऽनुमिनोति अयं वक्ता वाक्यार्थगोचरयथार्थज्ञानवान् आकांक्षादिमद्वाक्यप्रयोक्तृत्वात् अहमिवेति। न चात्र तेनानुमानेन ज्ञानवि-
शेषणतया संसर्गसिद्धिः पश्चात्प्रत्यायकः शब्दोऽनुवादकः अनुवादकत्वस्य गृहीतग्राह्यनुभवमात्रजनकत्वरूपत्वात्। स्वसमानाधिकरणस्याव्यवहितपूर्व-
वर्ति स्वसमानाकारनिश्चयविषयविषयकत्वहृद्धिशेष्यकत्वतत्प्रकारकानुभवमात्रजनकत्वरूपत्वादितिचेत्। स्वपदमनुभवपरं। वेदे तु वक्तुरभावाच्च
न तदनुमानं पूर्वमिति नानुवादकत्वेनाप्याहतं प्रामाण्यं अनधिगतार्थकानुभवकरणस्यैव प्रामाण्यरूपत्वात्। तच्च गृहीतग्राहीतरानुभवकरणत्वं
स्वसमानाधिकरणस्याव्यवहितपूर्ववर्तिस्वसमानाकारनिश्चयविषयविषयकेतरतद्धर्मिविशेष्यकतत्प्रकारकानुभवकरणत्वमिति यावत्। स्वसमा-
नाकारत्वं च स्वस्मिन् यादृशी तद्धर्मिविशेष्यकत्वावच्छिन्नतत्प्रकारिता तादृशी शतद्धर्मिविशेष्यकत्वावच्छिन्नतत्प्रकारिताशालित्वमिति प्राभाकराशयस्तत्राह निर्णी-

निर्णीतशक्तेर्वाक्याद्धि प्रागेवार्थस्य निर्णये। लिंगस्यैव विलंबेन शाब्दस्यानुवादिता॥१४॥
व्यस्तपुंदूषणाशंकैः स्मारितत्वात्पदैरमी॥ अन्विता इति निर्णीते वेदस्यापि न तत्कथं॥ १५॥ श्री॥

तेति। निर्णीतशक्तेर्वाक्यात्। वेदस्य लौकिकप्रायाकांक्षासत्त्वादिघटितशाब्दसामग्री तद्विशिष्टात् लौकिकवाक्यात् लिंगस्यैति विलंबेन उपदर्शितानुमाना-
त् प्रागेव अर्थस्य निर्णये वाक्यार्थस्य शाब्दबोधस्य भवे शाब्दस्य अननुवादितानोपदर्शिताऽनुवादितेति संपूर्णकारिकार्थः। सर्वत्रानुमितिसामग्र्याऽनियतत्वेन क-
चित्पक्षमतो वैदिकस्य लौकिकशाब्दसामग्रीत एव शाब्दबोधस्यानुभवसिद्धत्वात्करणतया लौकिकस्य निरुक्तप्रमाणत्वाक्रांततया तस्यापि प्रमाणत्वं निर्व्यू-
ढमिति प्राभाकरमतमनुपादेयमेवेति॥१४॥ ननु वेदतुल्यासामग्र्येव लोकेऽनुमानं विनानसंभवति। अनाप्तोक्तवाक्यत्वशंकाव्युदासस्य शाब्दबोधांगत्वात्
तच्च वेदे अपौरुषेयत्वनिश्चयात् लोके तु पौरुषेये आप्तत्वावधारणं तु आप्तस्तु यथार्थवाक्यार्थज्ञानवानिति तदंतर्गतयथार्थवाक्यार्थसिद्धेरनुवादको लौकिक इत्यत आह
व्यस्तपुंदूषण इति। दोषवत्पुरुषप्रणीतत्वनिर्णयेनाज्ञातानामौत्कटसंदेहकैः पदैः स्मारितत्वात्। अमी पदार्थाः अन्विताः परस्परसंसर्गवंत इति निर्णीते इत्यनु-
मितिसंभवे वेदस्यापि तदनुवादकत्वेन कथितमिति संपूर्णकारिकार्थः। अयं भावः। उपदर्शितरीत्या लौकिकवाक्यजन्यशाब्दबोधात्पूर्वमनुमानादिनासं-

२ नसाध्यं अपि तु अपरपदार्थ[redacted]सन्नपदप्रयोजकधर्मावच्छिन्ननिरूपितसंसर्गवत्त्वं २

ह्रेदविषये एकपदार्थेऽपरपदार्थनिरूपिततात्पर्यविषयसंसर्गवत्त्वे साध्ये इति यावत्। अनेकांतः करकाभिप्रायप्रयुक्तपयसा सिंचतीति वाक्यघटकीभूततत्तीयार्थसेककर
णत्वे व्यभिचारः तत्रापरपदार्थकरकासंसर्गवत्त्वरूपसाध्याभावादिति शेषः। नन्वेकपदार्थेऽपरपदार्थसंसर्गवत्त्वं तत्र वचनोपदर्शितस्य तत्त्वे व्यभिचारः सेककरणत्वेन चयप्र
योजक[redacted] इदंद्व्यत्वावच्छिन्नसंसर्गसत्तात्राह संभवेदेवेति। संभवेत्तथाविधसंसर्गस्वरूपयोग्यत्वे अपरपदार्थसन्नपदप्रयोजकरूपधर्मावच्छिन्ननिरूपितसंसर्गव
त्त्वे साध्य इति यावत्। निश्चयो न। एकपदार्थेऽपरपदार्थसंसर्गनिश्चयो न संभवतीत्यर्थः। तादृशनिश्चयस्यैव प्रकृते उद्देश्यतया उद्देश्यसिद्धेरिति भावः। द्वितीयानुमाने दूषय
ति। आकांक्षेति। सत्तया स्वरूपसत्तया आकांक्षा ततयेति यावत्। अभेदे तृतीया। आकांक्षाता आकांक्षा शाब्दप्रमाहेतुरित्यर्थः। अयं भावः पदानां पदांतरव्यतिरेकप्रयुक्तान्वयाननु
भावकृतं पदार्थसंसर्गावगमप्रागभावो वा आकांक्षा। नैयायिकमते स्वरूपसती शाब्दबोधे हेतुरिति यत्र नैयायिकनये वाक्यात् पदार्थसंसर्गसिद्धिस्तत्र वैशेषिकनये उ
पदर्शितानुमानात् पदार्थसंसर्गसिद्धिरनुपपन्नैव तत्राकांक्षाज्ञानाभावेन तद्घटितहेतुकानुमानासंभवादिति। ननु तद्घटितमेव लिंगमस्तु तत्राह योग्यासत्तिरिति। आकांक्षासामु
आयोग्यतासन्निध्याबंधनाबंधनं व्याप्तिस्तत्कुत इत्यर्थः। तत्तदुक्तयोः संसर्गप्रतीत्यप्रयुक्तेऽयमेति पुंसोरातः पुरुषोपसर्पिताभिसादेरात्पुरुषयोरासत्तियोग्यतासत्त्वेऽपि तात्पर्यजन
साध्यासत्त्वाद्व्यभिचार इति भावः। आकांक्षाघटितहेतौ तु न दोषः तात्पर्यगर्भपरस्परनिरूपिताकांक्षादिमत्ताभावेनैव व्यभिचारानिगूढाभिसंधिः एवं शाब्दधियं प्रतिस
शयनिश्चयसाधारणयोग्यताज्ञानस्यैव हेतुतया यत्र योग्यतासंशयस्तत्रोपसन्नपदार्थसंसर्गबोधस्योपदर्शितानुमानान्न निर्वाहः हेतुतावच्छेदकांशे निश्चयात्मक
परामर्शस्यैवानुमितिहेतुत्वादिति तत्र तन्निर्वाहार्थं शाब्दप्रामाण्यमावश्यकं। ननु योग्यतासंदेहस्य साध्यसंदेहपर्यवसन्नतया साध्यसंदेहस्यानुमित्यनुकूलत्वात् तथा
पदतावटकसंशयातिरिक्तसंशयात्मकमेव हेतुमत्तानिश्चयस्य मितिनानुपपत्तिरिति चेन्न। गौरवात्। साध्यव्याप्यसाधनवानयमिति संशयादनुमित्यापत्तेश्च। न चायमा
लोको धूमो वेत्युभयव्याप्यवान् इत्यत्र हेतुतावच्छेदकसंदेहेऽपि नैयायिकैरनुमितेरनुपगमात् व्याप्यवत्तानिश्चयत्वेनैवानुमितिहेतुत्वं तस्य च योग्यतारूप
विशेषेणासंदेहेऽपि संभवान्न काप्यनुपपत्तिरिति वाच्यं। व्याप्तिबुद्धिविधुराणामपि शब्दादन्वयानुभवदर्शनेन शाब्दस्य प्रकृष्टप्रमाणतावश्यकत्वात्।
नव्याप्तिज्ञानमूलककालीनः शाब्दप्रयोज्योऽनुभवोऽनुमितिः तस्या व्याप्तिधीजन्यत्वात्। न च यं व्याप्तिज्ञानाजन्यादिन्नत्वे वानुमितिः न च तत्रानुमि
तिसत्त्वे सामानाभावः समाने विषये शाब्दसामग्र्या बलवत्त्वात् अनुमितिप्रति शाब्दसामग्र्याः प्रतिबंधककल्पने गौरवं। मन्मते (तु) अनुमितिसामग्री प्र
(तिबंधे) तच्छाब्दात्मकानुमितिस्वीकारेण तत्र तत्प्रतिबंधकत्वात्। एवं भिन्नविषये अनुमितिसामग्र्याः शाब्दसामग्र्याश्च प्रतिबंधकताद्वयकल्पने गो

२०

॥१५॥ सत्त्वस्यापि प्रवेदनात्। अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तत इत्यादिना कर्तृत्वसद्भावस्यापि प्रतिपादनादिति कारिकापूर्वार्द्धार्थः। नन्वेवं सति कर्तृत्वाभावावेदकस्याप्याम्नायस्याप्रामाण्यापत्ति
स्तत्राह निरंजनेति। अंजनपदार्थो दुःखादिकं तदभावप्रतिपादनपरो न तु सर्वथापि कर्तृत्वाभावादिबोधकपदघटितोऽपि तत्परः ईश्वरे कर्तृत्वाभावप्रतिपादनतात्पर्यमिति
द्वितीयार्द्धार्थः। विरुद्धयोर्द्वयोर्मुख्यार्थत्वं न संभवतीति एकस्यामुख्यार्थतायां निर्बाधबोधकस्यैव तत्कल्पनीयं सत्त्वबोधकस्यानुमानसंवादेन स्वार्थे स्थैर्यात् एवं च निरंजनत्वबो
धकश्रुतिसत्त्वेन स निर्द्धर्मकः कथं कर्त्तेति निरस्तं। कर्तृत्वबोधकप्रामाण्येन निखिलविशेषगुणविरहबोधकत्वादिति भावः। निर्गुणत्वावेदकश्रुतीनां [illegible] संकुचितार्थत्वकल्प
नातः कर्तृत्वाद्यावेदकानामौपाधिककर्तृत्वादिपरत्वमेवेति तु युक्तं। मानान्तरेणाननुभूतस्य पदादुपस्थित्यसंभवात् क्वचन निर्द्धर्मकं ब्रह्मापि तु मेव न शक्यमिति निर्द्धर्मकं वा कार्य
एव न संभवतीति तु न युक्तं। प्रमेयत्वादिसमनुभवे प्रमेयत्वेन धर्म्याभावविशिष्टस्याप्यनुभूतत्वात्। अद्य इष्टविशेषस्येव प्रमेयत्वांशे उद्बोधकत्वकल्पने न केवलधर्म्याभावविशिष्टस्य स्मरण
संभवः। तदंशेऽन्याप्रकारकस्मृतिप्रतीत तदंशेऽन्याप्रकारकत्वेन तु नानुभवस्य हेतुत्वं। जातिमाननुभवो नरं स घट इत्यादिस्मरणापत्तेरस्तु। जातित्वांशे उद्बोधकत्वाभ्युपकल्पनेनैव
वारणात्। उद्बोधकत्वाभावाभ्यां फलोन्नेयत्वादिति। अनयैव रीत्या अदृष्टरावणादिविषयकपदशक्तिग्रहतो रामरावणादिबोधोऽपि। ननु तत्र भवति विशिष्टविषयकसंस्कार[illegible]
रामरावणत्वादिना स्मरणं। सखादिपदान्निर्द्धर्मकस्य ब्रह्मणो निर्विकल्पकस्मरणं तु कथं तद्विशेष्यकतत्प्रकारकस्मृतिं प्रति तद्विशेष्यकतत्प्रकारकसंस्कारकसंस्कारस्य हेतु २।

न वा सो क्वचिदेकान्तः सत्त्वस्यापि प्रवेदनात्। निरंजनाववोधार्थो न वसन्न्यपि तत्परः॥१७॥
हेत्वभावे फलाभावात् प्रमाणेऽसति न प्रमा। तदभावात्प्रवृत्तिर्न्न कर्मवादेऽप्ययं विधिः॥१८॥

त्वात् जायमानस्य प्रकारकमेव स्यात् न तु निष्प्रकारकमिति चेत् तद्विषयकस्मृतिं प्रति तद्विषयकसंस्कारत्वेनापि सामान्यकार्यकारणभावकल्पनाद्विशेषणज्ञानं विना जाय
मानं प्रकारकमेव स्मरणं निर्विकल्पकमेव जायते। अथवा तत्रापि धर्म्याभावप्रकारकमेव स्मरणं। अधिकरणस्वरूपाभाववादिमते अभेदेऽपि प्रकारविशेष्यभावभानाभ्युपगमा
त्। निर्विकल्पकत्ववर्णनं तु तदन्यधर्माप्रकारकत्वाभिप्रायकमित्याद्यन्यत्र विस्तरः॥१७॥ यागादौ वेदं विनैव प्रवर्त्तेतेति किं वेदेनेति प्रवर्त्तकवेदान्यथानुपपत्त्यैव भगवदभा
वस्य आपाद्यस्यापि निरवकाशत्वमित्याशंकेत्याह हेत्वभावेति। हेत्वभावे कारणाभावे फलाभावात् कार्याभावात्। प्रमाणे असति यागादौ इष्टसाधनताबोधकवेदे असति न प्रमा याग
दाविष्टसाधनत्वादि प्रमा न भवति तदभावात्। यागादाविष्टसाधनत्वादिप्रमाया अभावात्। प्रवृत्तिर्न यागादौ प्रवृत्तिर्न स्यादिति कारिकाकारिकात्रितयपर्यन्तार्थः॥ तस्मादिष्टसाध
नतावेदकवेदस्य नेश्वरेणैव [illegible] न वावश्यकेन वेदेनेश्वर[illegible]वैयर्थ्यं प्रवृत्तिकारणप्रमोत्पत्त्यै वेदस्य वेदप्रामाण्याय चेश्वरस्यावश्यकत्वादिति भावः॥ ननु प्रवृत्तिं प्रतीष्ट
साधनताज्ञानस्य हेतुत्वे सिद्धे सर्वमिदं स्यात् तदेव नेतित्याह कर्मवादेऽप्ययं विधिरिति। येनेश्वरो नाद्रियते कर्मैव च जगज्जायत इत्युच्यते तन्मतेऽप्ययं कार्यकारणभाव आ
वश्यक इ[illegible]त्यर्थः। अन्यथा तन्मतेऽपि कर्मत एव प्रवृत्त्या स्यात्कार्योपपत्तौ न तदावेदकवेदस्य निष्प्रयोजनत्वं दुर्वारं स्यादिति भावः॥१८॥ श्रीगुरुचरणकमलेभ्यो नमः॥ श्रीः॥ द्वि॰

सर्गसिद्धिरावश्यकीति लौकिकवाक्यमनुवादकं यदि तदा वैदिकवाक्येपि तद्दुर्वारमेव तत्रापि शाब्दबोधे प्रतिबंधकानाप्तोक्तत्वशङ्काव्युदासार्थं दोषवत्पुरुषाप्रणीत
त्वनिर्णयस्यावश्यकतया दोषवत्पुरुषाप्रणीतपदस्मारितत्वहेतुना एकपदार्थे अपरपदार्थसंसर्गानुमानस्य शाब्दबोधात्पूर्वं संभवात् यदि शाब्दबोधे अनाप्तोक्तत्वसंदे
हस्य ग्राह्यसंदेहपर्यवसन्नस्याप्रतिबंधकत्वमिति वैदिकवाक्यजन्यशाब्दबोधात्पूर्वं तन्निवारकदोषवत्पुरुषाप्रणीतत्वनिर्णयस्यानावश्यकतया नोपद
र्शितरीत्या वेदस्यानुवादकत्वमित्युच्यते तदा लौकिकवाक्येपि न तत्सर्वत्र लौकिकवाक्यजन्यशाब्दबोधात्पूर्वमुपदर्शितानुमानस्यावश्यकत्वात्. शाब्दबोधेऽना
प्तोक्तत्वसंदेहस्य योग्यतासंशयद्वारा प्रतिबंधकत्वेन तदुच्छेदकाप्तोक्तत्वनिर्णयस्यापि तदानपेक्षितत्वात्. अनेन यत्संशयव्यतिरेकेण निश्चयो यत्र प्रतिबंधको
तन्निश्चयस्तत्र हेतुरनुमितौ व्याप्तिरिवेति नियमेनाप्तोक्तत्वनिश्चयस्य तद्धेतुत्वमिति निरस्तं. न संशयेपि वाक्यार्थबोधोत्पत्त्या तत्संशयस्याप्रतिबंधकत्वात्. अव्यभि
चारसंशयव्यतिरेके निश्चयप्रतिबध्यो व्याप्तिज्ञाने व्यभिचारेण प्रयोजकत्वेन तादृशनियमाभावाच्च. अपि च तत्तत्कार्यतावच्छेदकं शाब्दत्वं वा लौकिकवाक्य

न प्रमाणमनाप्तोक्तेर्नादृष्टे क्वचिदाप्तता ॥ अदृश्यदृष्टौ सर्वज्ञो न च नित्यागमक्षमः ॥१६॥

जन्यशाब्दत्वं वा लौकिकत्वेन ज्ञातवाक्यजन्यशाब्दत्वं वा. न प्रथमः वेदे तदभावात्. न द्वितीयः आप्तोक्तत्वानिश्चयेपि वेदानुकारेण पठ्यमानमन्वादिवाक्ये पौरुषेय
त्वाभिमानानां गौडमीमांसकानां शाब्दबोधोदयेन व्यभिचारात्. नापि तृतीयः। लौकिकत्वेनाज्ञातलौकिकस्थलेऽपि शाब्दसामान्यसामग्रीत एव लौकि वाक्यपर
कत्वेन ज्ञातवाक्यादपि शाब्दोत्पत्तिसंभवेन तस्याकारणत्वादित्याद्यन्यत्र विस्तरः ॥१५॥ ननु यद्दर्शितरीत्या यदि शब्दः प्रमाणं तर्हि कथं जगत्कर्तृपुरुषासिद्धिः साक्षी चेता
केवलो निर्गुणश्च. न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुरित्यादिशब्दस्यैव तत्र बाधकत्वात्. प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहंकारविमूढात्मा कर्ताहमिति मन्यते
इत्यादिना वेदेन तस्य कर्तृत्वे भ्रांतिप्रतिपन्नमिति प्रतिपादनाच्च. न च सर्वज्ञ ईशो विशेषदर्शिभिन्नमसंभवति। तस्मादीश्वरे जगत्कर्तृत्वं नास्तीति नानुमानादिना जगत्कर्तृत्वेनेश्वरसि
द्धिरित्यत आह न प्रमाणमिति. उपदर्शितवाक्यं प्रत्यनाप्तोक्तं तर्हि तन्न प्रमाणं. अनाप्तोक्तेरप्रमाणत्वात्. तथा वा प्रमाणत्वादेव न तत्र बाधकम्. यथाप्तोक्तं न हि अदृष्टेऽर्थे आप्ता
ते क्वचिदाप्ततानेति तदर्थगोचरयथार्थज्ञानवत्त्वं तदुक्तेः प्रामाण्यावश्यमेवं अपेक्ष्यं. न च तज्ज्ञानं तदर्थातीन्द्रियगोचरं नासर्वज्ञस्य संभवतीत्येतदागमप्रामाण्यानुरोधेनापि सर्वज्ञो भगवाना
याति. ननु तस्याकर्तृकत्वं एतादृशवाक्यस्यैव कर्तृत्वात्. न च शब्दस्य नित्यत्वान्नैवं सर्गप्रलयव्यवस्थापनेन शब्दस्यानित्यत्वव्यवस्थापनादिति संपूर्णकारिकार्थः ॥१६॥ ७
नन्वेवं सतीश्वरे कर्तृत्वाद्यभावावेदकस्योक्तागमस्य का गतिरित्यत आह न चासावृति. असौ आगमः क्वचिदेकांत एव ईश्वरे कर्तृत्वाद्यभावासाधक एवास्तीति न.

मनुपलंभस्यप्रमाणांतरत्वमितिउद्भावनतः तथाहिघ्राणेन्द्रियजन्यसौरभज्ञानानंतरं सुरभिचंदनमितिरूपनीतभानवत् अनुपलंभ अप्रमाणं [redacted] जाभावज्ञाना
नंतरंसमवाधिकरणेयोरूपनीतभानेरूपविशिष्टबुद्धिसंभवेनतदन्यथानुपपत्त्याऽभावधियइन्द्रियजन्यत्वोपपादनमनुपलंभस्यप्रमाणांतरत्वखंडनमयुक्तिसहमतःपूर्वोक्तयुक्ति

अयंभावः अभावबुद्धेरिन्द्रियजन्यत्वानभ्युपगमेऽसमाधिकरणयोर्विशिष्टबुद्ध्यनुपपत्तिः॥पाषाणज्ञानेरूपसांकर्याभीयाएकज्ञानेसाधारणप्र [redacted] भावमात्रप्रा स्त्व २
आधेयस्याभावबुद्धेर्विषयत्वेनाधिकरणभानासंभवादनुपलब्धेः अभावमात्रप्रमाणोपगमस्यावश्यकत्वात्अनुपलब्धिप्रमाणजन्याभावबुद्धेर्विशिष्टेनाधिकरणविषयत्वादिअनुमानेनाभावबुद्धेरिन्द्रियजन
मात्रजन्यत्वमपाकृतम्अनुपलब्धिप्रमाणजन्याभावबुद्धेरिन्द्रियजन्यत्वात्तत्र्यायमभावस्यनिर्विकल्प
२७ हत्वेनतत्रप्रमाणांतरस्यासंभवादित्यत्रकृतेऽनेनाभावबुद्धेरिन्द्रियजन्याधिकरणविषयत्वादित्युक्त्वा
त्वसिद्धौविशिष्टबुद्धेर्वस्तुतोऽभावबुद्ध्युपपत्तौ [redacted] नन्वभावबुद्धेरिन्द्रियजन्यत्वे पूर्वंभावप्रपंचत्वात् अभावेनेनि
कल्पकत्वसिद्धौइन्द्रियजन्यज्ञानविषयस्यनिर्विकल्पकत्वेघटत्वादिप्रकारकत्वं वा इन्द्रियेणाभावबुद्धिः पूर्वभावप्रपंचत्वात्अभावोऽनेन प्रतियोग्यप्रसिद्धताभाव
कवैयर्थ्यसिद्धेःइन्द्रियजन्यज्ञानविषयस्यनिर्विकल्पकत्वेघटत्वानियमात्तथ्यवाइन्द्रियेणाभावबुद्धिः प्रतियोगिज्ञानस्यहेतुत्वमप्युपपन्नमस्यादिति प्रतियोगिपरिगणितानिवा यमन्यभा
वत्वस्यनिर्विकल्पकत्वेति शेषः॥ अयंभावः॥ अभावबुद्धेः प्रतियोगिज्ञानस्यहेतुत्वमप्युपपन्नमस्यादित्यपेन प्रतियोगिज्ञानस्यविशेषणज्ञानत्वेऽपि प्रतियोगिनिवायमन्यमा
प्रसक्त्यापत्तेः नचप्रतियोगिज्ञानं विनापि इंद्रलाभिज्ञातेमः सामान्याभावात्मकघटादिकस्यस्त्रोरूपेणत्वमविचारणत्वेयमिनिवाचेन्नभा
वत्वप्रकारकत्वे किं कृतमनुपसत्त्वावच्छिन्नप्रतियोगिताकत्वमस्येति तुच्छत्वेनानुपपत्त्यभावात्तथाचाभावोऽनेनिर्विकल्पविषयः
वत्वप्रकारकत्वे किंकृतमन्यत्वावच्छिन्नप्रतियोगिताकत्वमस्येतितुच्छत्वेनाचेष्टयोपिदुर्घटः २२
अथचेदस्य अलौकिकत्वार्थोपि सिद्धसाधनात्॥ आपद्यतेऽसिद्धान्तप्रतियोगिनःप्रकारविधयाभानसंभवात्पक्षविषयस्यनिर्विकल्पक 23
पूर्वप्रतियोगिभासकसामग्र्या अभावप्रत्यक्षत्वेनसर्वत्राभावप्रत्यक्षेप्रतियोगिनः प्रकारविधयाभानसंभवात् अप्रसिद्धप्रतियोगिप्रतियोग्यप्रसिद्धताभावप्रत्यक्षापत्तिःइष्टापत्तिलक्षणा
वेधत्वनियमेनाभावात्त्वनुप्रतियोगिज्ञानस्यहेतुत्वंकथमुक्तिःसंबन्धवन्नप्रत्यक्षनिर्विकल्पप्रतियोग्यप्रसिद्धताभावप्रत्यक्षस्याप्रसिद्धत्वात् आपत्तेर [redacted]
मभावोऽनिर्णयतइतिसिद्धांतान्तरसंभवतोनिवाच्यप्रतियोग्यप्रसिद्धाभावप्रत्यक्षस्याप्रसिद्धा [redacted] स्तम०
[redacted] २७
[redacted] संभवात्तत्रचप्रतियोगितावच्छेदककालेइत्यपसवहविशेषणत्वात्प्रमा
[redacted] संभावात्तत्रचप्रतियोगितावन्न्यस्यकालेःइत्यपसवहविशेषणत्वात्तत्वप्रमा
नत्रेन्द्रियप्रसक्तासत्तेरभावादित्यत्राह अवच्छेदेत्यवच्छेदः प्रतियोग्यादिः तद्ग्रहस्यध्रौव्यात्तत्राभावबुद्धेः १०

स्नायेक्षया प्रत्यासत्तत्वस्य नाया स्याप्यत्वा ... सामा [illegible] भावेन नस्याप्रयागा तासंभावा ... सायाएं भावेपि पं लापोगव्यवच्छिन्नकारणत्व
स्पव र एणं स्वमुपपद्यते एवं ... नेत्या व्य ... तेनेकारण ... मिति सं नम्पदी ति वे न ः फलापोगव्यवच्छिन्नकारणत्वस्याप्यावरसाध्वाणकारणकारणत्वा
ये सम्यग् ... लेनेहेपत्वी त ः तथाहि ः निमीलनस्य ... पामध्यकाले ... [illegible] ... लापोगाहि ... पावत्कारणसमव्याप्तोनपर ... मव हि ... नेत्र ... पो
मतिसत्त्वे ... फलापोगव्यवच्छिन्नत्वा ... तस्या ... [illegible] ... स्यायपाव ... पायत्वात्कारणत्वापेक्षयेतिसुधी
मिति भावः नी यमित्या [illegible] ः १० [illegible] ... सत्त्वा तुपलब्धेः प्रमाणान्तरत्वे ... प्रतियोगिनीति ः अत्र
त्रेन्द्रियाणां निपक्षः अभाव ... प्रतियोगि ... प्रतियोगिताहरूका ... धिकरणं ः तथाचानुमानादौ
वप्रतियोगिनि निर्वाह ... [illegible] ... सामान्य मा ते सेन्द्रियस्याभा
वग्राहकत्वे सिद्धे ... [illegible] ... मनुपलब्धेः प्रमाणान्तरत्व
मिति भाव ः ॥ नत्वया ... [illegible] ... इति ः नतु ग्राहकसंग्रहजन्यत्वेन
चान्यथा सिद्धः ... [illegible] ... दर्शितानुमानात्साध्यसिद्धेरत्रा
प्रतियोगिनिसाम ... [illegible] ... नात्र २५
... [illegible] ... ॥ व्यापकेणव्यापारेणान्यथासिद्धे
हत्वाया एवव्यवधान तदिति ः अथि ... [illegible] ... इति ः दोषाणांपिनादिते
तिसिद्धत्वादिति दोषः ः उपदर्शितानुमानस्या ... [illegible] ... उपपत्तिः तेनतेन ... व्याणस्यभावा ह५
माण मिन्द्रियाश्रितत्व नियमाद्विरूपर्थः ॥ [illegible] ... भावप्रमस्येन्द्रियजन्यत्वात्रत्युपगमस्या
नदोषस्येन्द्रियजन्यत्व नियमेनानुपलब्धौ तत्संभवादिति ः न ... [illegible] ... कारणान हेतुरपितु दोषस्ख्यात्वानो
वदपकत्वे ... ने ... भावानुपपद्यमानानुपलब्धेः ॥ प्रमाणान्तरत्वा ... [illegible] ... तानस्यानुमयासिद्धस्यसत्वादित्यर्थः ॥
तु प्रमाणाः भावबुद्धेरिन्द्रियजन्यत्वसिद्धिरपि ... इति ... [illegible]

व५

ग्राहकस्येन्द्रिय स्याभाव ७

२५

१८ तोयद्वितीयादिरिति असमस्तखण्डलीलो सर्वे असमानिरूपमायाखण्डलीला जाचेतनान्तात्मसाधेऽत्र कोऽयं नुत्तमो युक्तोऽनन्तं कर्मपरस्ताद्यदि वा कामपि हेवस
विभ्वादिरूपं च इति असद्धा: असुगम अद्भाविनिशिखवयं अपघर्मेनमस्कुर्महे निसर्गमहत्तोकार्य:।। २३ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीनारा
यणतीर्थकृतायां कुसुमाञ्जलिव्याख्यायां तृतीयस्तबकव्याख्यानम्।। नन्वपरोक्षितीश्वरे सादिकर्तृत्वे नेश्वरासिद्धावपि तस्यप्रमात्मत्वं प्रसिद्धं अ
गृहीतयाऽहितात्मकप्रमात्वस्य भिन्नतया तज्ज्ञाने: भावात् तथा चेश्वरेऽपि वेदस्य तत्प्रमितिमत्त्वलक्षणेनाप्तत्वे ग्रन्थकपामहाजनपरिग्रहोन
स्यादिस्याशंक्य अपनेतुं प्रमाणलक्षणमप्यनिर्वचि; अप्रामाण्येति. अपूर्वं कु: अनधिगतार्थाधिगन्तृत्वं धर्मपरानिर्दिष्टो नन्ताद्यत्तानलं प्रमाणलक्ष
णं धारणवाहिकप्रमाणासम्पादते: अनामे: अत्रे च दोष:।। ननु प्रमाणवाच्यपरमां न्योन्ति दिक्प्रमावात्मतो: यथा ख्यातेस्तं प्रत्यगमान् अ
नधिगतपदेनैव तद्व्यावृत्ते: यथार्थेति निर्देशे: एवं नाप्यव्याप्तिः धारावाहिकज्ञानानामनुभवत्वात् नच यथार्थानुभवमात्रं प्रमाणं जनकत्वस्य
प्रत्यक्षादिभिर्व्यभिचारात् प्रत्यक्षादिकं प्रतीयते तन्निर्विकल्पकं विशेषविधिना धारावाहिकादिकं सर्वानुगतमेकमसमस्तखण्डलीलो
त्सवं स्यानामपि देवमद्भुतमिति अद्भुत: प्रयुयाम:।। २४ इति कुसुमाञ्जलिकारिकायां तृतीय: स्तबक: समाप्त:।। अप्रामाण्यमधिकृत्य लक्षणमपरं दृष्टं।। यथार्थानुभवो मानमनपेक्षतयेष्यते १
अपि स्मृतेः प्रमाणत्वे नापि प्रत्यभिज्ञायाः यथार्थानुभवजनकत्वं प्रमाणत्वं न च स्मृत्यप्रमात्वक्षतप्रतिविषयार्थमनधि
गतार्थविषयकत्वमेवेति विशेषात् नन्वनधिगतार्थविषयकत्वानं जन्यप्रमात्वं दोषाप्रमाणवाद्यनि:।। अधिगतार्थविषयकत्वानां
न कत्वप्रमाणवाद्येन तत् ज्ञातत्वे तिरा प्रामाण्यं न धिगते ति: इत्यस्यावाधातः अनधिगते सादृश्यलेनानर्थानतस्या हि
अनधिगनत्वं यतो वदं विहन्तुं स कैव जातं नाय: स्मृतेरप्रमात्वात्पन्ने: नास:।। प्रमत्तानामप्रमाणवसंगात् न नहि स्वस्याप्रस्य तापं राम०
मानत्वात्: न च स्मृतेः पूर्वमनधिगमनत्वं द्वितीयादिज्ञानानां यथार्थत्वेऽपि प्रामाण्यं मा भूदिति वाच्यं द्वितीयादिज्ञानानाम
नां सर्वसिद्धिप्रमाणत्वाभाव प्रसंगात् द्वितीयप्रमात्वाभावप्रसंग: न हि प्रथमप्राप्तिप्रभृति तेष्वाननक्षत: न च नन्वसेन १८

26

संभवतीति वाच्यं । इन्द्रियसंयुक्तविशेषणतायाः प्रतियोगितावच्छिन्नाभावप्रत्यक्षं प्रत्येव हेतु-
सति वस्त्वाद्यभावप्रत्यक्षत्वावच्छिन्ने आपत्तेः लौकिकप्रत्यक्षत्वावच्छिन्नं संभवतीति वाच्यं । इन्द्रियसंयुक्तविशेषणतायाः प्रतियोगिविषयतानिवेशे प्रतियोगिभेदेनानन्तकार्यकार-
णभावापत्तेः तथापि स्वाश्रयत्वात् । न चेन्द्रियसंयुक्तविशेषणतायाः कार्यतावच्छेदककोटौ प्रतियोगिविषयतानिवेशे प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिविषयताम्‌ । न
नायाः कल्पनेन तथापि स्वाश्रयत्वात् । न चेन्द्रियसंयुक्तविशेषणतानामेव स्वप्रकारो भवतु धर्मावच्छिन्नप्रतियोगिताकत्वसंबंधेन प्रतियोगिविषयताम्‌
कारणाभावप्रसक्तिः गौरवात् इष्टत्वात् तत्वेन प्रतियोगिताविषयतायां विशेषणतायाः प्रतियोगिविषयकत्वसंबंधेनाभावप्रत्यक्षस्य समे-
वेऽपि विषयता संबंधेनाभावबुद्धेः स्वातन्त्र्ये तु लौकिकत्वेन येन विनिगमनाविरहात् विशेषणतायाः कार्यतावच्छेदककोटौ प्रतियोगिविषयताति
वात् । अभावस्य निर्विकल्पकावेधत्वासिद्धान्तस्य तेनैव निवेशेन मोक्षः । इन्द्रियसंयुक्तविशेषणतायाः कार्यतावच्छेदककोटौ प्रतियोगिविषयतानिवेशे तथा सत्यभावस्य निर्विकल्पकवेधत्व-
विशेषस्यापि प्रतियोगिज्ञानपरेऽस्त्वेव माना भावः । न च प्रतियोगिप्रतियोगिज्ञानाभावप्रत्यक्षस्य प्रतिबन्धकत्वाभावप्रत्यक्षानुपपत्तिः । प्रत्यक्षापत्तेः तथा सत्यभावस्य निर्विकल्पकवेधत्व-
मभ्युपेयते । तत्र विषयाभावे संसर्गाभावप्रत्यक्षे प्रतियोगिज्ञानस्य हेतुत्वेन साधनात् । अभावनिर्विकल्पकाभ्यु-
पगमस्यावश्यकत्वात् । अन्यथा अनुपपत्तिः स्यात् अप्रसक्तत्वात् । अभावत्वप्रकारकप्रत्यक्षानुपपत्तेः । निर्वच्छिन्नप्रकारिताकत्वेन निर्वच्छि-
न्नविषयिताकज्ञानस्यैव हेतुत्वात् । अभावस्यापि निर्विकल्पकवेधत्वं युज्यत इति ध्येयम् ॥ न चावोऽभावस्य निर्विकल्पकवेधत्वसिद्धान्तो निर्यु-
क्तिकत्वात् इन्द्रियनिरूपितभावः ॥ इन्द्रियप्रत्यासत्तेः अभावप्रत्यक्षत्वावच्छिन्नं प्रति प्रयोजकत्वे सिद्धे तत्रैव प्रतियोगिकालिकत्वविशिष्टप्रत्यक्षत्वस्य प्रत्यासत्तिरेव
रूपसंबंधात् तत्संबंधाद्युपगमेन तस्य यत्नाधिक्यं । अन्यथा लाघवात् अन्वयव्याप्तेः ह्येतन्नत्वात् तत्संभवात् नन्वप्रत्यनुपपत्तिरिति भावः
प्रत्यक्षाभावसंबंधत्वमिति विशेषः । न चाप्रत्यक्षपसंबंधविशेषप्रत्यक्षविशेषणतायाः प्रत्यक्षस्य स्वत्वेन प्रत्यक्षत्वप्रयोजकत्वेन तद्विशेषः २२
वः ॥ अभावनिर्विकल्पकाभ्युपगमः स्वप्रत्यक्षे संबंधानुपपत्तेः । अभावत्वेनाभ्युपगन्तव्यमिति प्रत्यक्षानुपलब्धेः । प्रत्यक्षस्येति ति-
अभावनिर्विकल्पकं स्वसंबंधविनाशाभावविकल्पयोर्विशेषितबुद्धिं प्रति निर्विकल्पकत्वेनैव ज्ञानस्य कार्यत्वानुपपत्तेः प्रत्यक्षविशेषणप्रमाणेऽयं नवत्यादिपत्तौ
अत्र यतः पदार्थानां च इदमेव सतः । न च पत्र संविशेषभावसाधकत्वेन मिमतेः । अपसिद्धान्तापत्तिरिति भावः । आमाप्यनासाद्यते अत्र विशेषोऽयं
अविधौ पत्वे श्वासस्य पुत्रवीक्षणेन स्नानसाधनेन स्वविधौ बिम्बकमानवाक्यं तेन तदनुभावः । अनुविधेया वस्यापत्रस्तत्र इण्यं सता
यो । धर्मेऽभ्यन्तरप्रयोगविधेयोदाहरणं इन्द्रियविशेषणतया । शारीरस्यावस्थाहि । २

१९

तिरिक्तपदार्थस्वरूपमेवानन्तरनुपपत्तिः। यत्र यद्ज्ञानवत्त्वात् तदीयकार्यज्ञानानन्तरीयकमिति स्वरूपमात्रं तथाच पूर्वपूर्वज्ञानोत्तरोत्तरज्ञानानामर्थः [illegible] भावनियमे तिष्ठ भावनियमे तिष्ठ भावनियमा
उत्तरोत्तरज्ञानानामग्रहात् तस्माद्धि बुद्ध्या न प्रमाणस्य [illegible] तिरिक्तपदार्थे द्वैविध्यमिति भावनियमेतिस्वभावनियमेतिस्वभावनियमा भा
वात् कारणविशेषस्य कार्यविशेषजननस्वभावनियमात् स्वरूपमात्र उपकारो विज्ञाननानात्वे नियतिरूपस्य व्यापि घटः॥ तेन ज्ञाने नतत्रोपकार
न्यते नान्यत्र युक्तमिति प्रत्यक्षस्य लक्षणं तेषु दुःखमाधेयस्य तद्वद्विशेष्यभावेनैवेति भावः। सिद्धे तत्र स्वभावसंबंधिनेवज्ञानान्तरीयत्वविषयकमि
ति नियमस्त्वमवादि, सोऽपि नि भवतु वा [illegible] ज्ञानानामनवस्थितविषयमाने तथा चानन्तरीयत्वनियामकः स्वभाव एवेत्यत्र विषय एवा
स्तीति भावः २ ननु ज्ञानं कर्म [illegible] जनकत्वात् गमनक्रियावदित्यनुमानं, विषयेऽपकारे सिद्धे परिशेषाज्ञानातिरिक्तपदार्थसि
द्धिरित्यत आह [illegible] अनेकान्तादिति [illegible] व्यभिचारात्। उपादानघात्वर्थकर्मत्ववि
स्वभावनियमाभावादुपकारे विदुर्घटः ॥ सुखदुःखे विषयसंबंधानिकायनिरूपणा २ अनेकान्तात् सिद्धे द्विधाविशेषमिति क्रिया॥ तेहे
[illegible] लोकानुभवोपयिके ३
विद्यजननात् पदिकर्मत्वात् स्वज्ञानस्य [illegible] ज्ञानस्य [illegible] १ इत्यर्थः
साधनेक्रियानलिंगमितिज्ञानं [illegible] क्रियावान्नेत्यर्थः [illegible] घटः सिद्धः [illegible] सिद्धिरित्यर्थस्तत्र हेत्वे
स्तत्क्राह तद्वेति [illegible] विषयकत्वात् [illegible] अनुभवो ज्ञानो घट इति शेषः॥ नापि केन चिद्विष
यता [illegible] विषयतानि रिक्ता ज्ञानस्य विषयताकारो
निभावः॥ न च ज्ञानस्य [illegible] ज्ञानमानसंभवात् [illegible] प्रत्यक्षासंभवेन नन्वनुमानु
मानाद्यप्ति [illegible] ज्ञानाभावेन तथा चा [illegible] नीतमानमप्यसि [illegible]

दु

पूर्वमसत्त्वं विवक्षितं तथापि प्राथमिकघटत्वादिज्ञानानामप्रमात्वप्रसंगात् न द्वितीयः अप्रमायामपि ज्ञानत्वात् । एतज्ज्ञानमिति तद्गुरुत्वे
एवं स्मरणत्वमित्यपि न वाच्यं स्मरणस्य [illegible] निष्ठात्वेः स्वसमानाधिकरणस्मृत्यरहितपूर्ववर्त्तिसमानाधिकरणज्ञानाविषयविषयकत्व
रूपानधिगतार्थग्राहित्वात्मकप्रमात्वस्य निष्कृष्टस्य तत्राप्रमाया धारावाहिकनिरवयवो [illegible] धारावाहिकबुद्धीनां पूर्वज्ञानाविषयपक्षत्वावि
[illegible] क्षणानां निरूपयितुमशक्यत्वेन विषयत्वकरणादिति संक्षेपः ॥ ननु भवन्मते कथं स्मृतित्वमिति तत्रा
[illegible] ॥ [illegible] ज्ञानत्वसाक्षाज्जातिरूपो विशेषरूपो ननु भवन्तु
स्वरूपयथार्थानुभवो मानमिति [illegible] प्रमा [illegible] नियामकतापवि शेष्यताप्रकारतयोः स्वच्छेद्यावच्छे
दियथं स्मृतित्वमेव स्पष्टः ॥ [illegible] प्रमात्वप्रतिबन्धकताय तन्त्रकारकत्वनिषे
धमावनिरशः ॥ अप्रमासाधारण्याय [illegible] अनुभवत्वात् स्मृतिसंस्कारमात्रजन्यज्ञानं मात्रय

वै

त्रः ॥ [illegible] ननु यथार्थज्ञानमेव प्रमालक्षणमस्तु किंमिति
रनवहिते [illegible] इष्टत्वात् अनुमितिवदुपमितिरिव मि

वृ

स्मृतिरप्यप्रमा [illegible] अनधीनप्रामाण्यकतयानुभवस्यप्र
त्वप्रमितिकरणत्वेन विभजनात् [illegible] प्रमा [illegible] भावः ॥ अयथार्थानुभवस्य प्रमाण
मात्वमिति प्रमात्वमनुभवघटितमिति [illegible] नवानुभवस्य प्रमाणेन तात्पर्य
मात्वायत्तेः [illegible] प्रत्यक्षमित्येकं [illegible] निवेशपरस्प
॥ तत्रिकारणं तत्र प्रमाणत्व [illegible] तस्मात् स्मृतिभिन्नज्ञानमनुभवघटितमेव प्रमालक्षणं वाच्यमित्यालो
चयमिति [illegible] तथाविधा
विलयः १ ननु घटत्वेन घटोपादान [illegible]

४=

28

४

कुसुमांजलिव्याख्या।

29

॥ २० ॥

नज्ञाततामेदोपपन्नेरित्याद्यन्यत्रविस्तरः॥ ननु विषयतायाः स्वरूपसंबंधत्वे अतिरिक्तत्वे वा विषयभेदेन भिन्नायाः कथमनुगतप्रतीतिरिति चेन्न। विषयतात्वमेकमंगीक्रियत एवेति अतो घटत्व
विशिष्टबुद्धिं प्रति घटत्वविषयकज्ञानत्वेन हेतुतायां विषयतायाः प्रकारताविशेष्यतादिभेदेन भिन्नतया एकस्या निवेशेऽन्यविधविषयताशालिज्ञानाद् [illegible] विशिष्टबुद्ध्युत्पत्तिप्रसक्ति
रपि निरस्ता। तत्र विषयतात्वेन प्रकारताविशेष्यतयोरनुगमेनानुपपत्त्यभावादित्यास्तां विस्तरः॥ सा च विषयता त्रिविधा। विशेष्यताप्रकारतासांसर्गिकी चेति भेदात्। यथा घटो
यमित्यत्र घटत्वेन प्रकारता। घटे विशेष्यता। संबंधे समवायादौ च सांसर्गिकी ज्ञाननिरूप्यते त्या [illegible] दिकं स्वयमेवोह्यम्। भासमानवैशिष्ट्यप्रतियोगित्वं भासमानवैशिष्ट्यानुयोगित्वं विशेष्य
त्वमिति तु संप्रदायः॥ अत्र विशेषोऽन्यत्रावसेयः॥ ३॥ ननु घटज्ञानादीनां घटविषयकज्ञानानां घटे तया भेदसिद्ध्यर्थानुपपत्त्या घटज्ञानादिजन्यज्ञातताभ्युपगम आवश्यक इत्यत आह अर्थेनैवेति। अत्र
प्रथमो हि शब्दो यस्मादर्थे द्वितीयो हि [illegible] शब्दः अनन्तरोक्तेऽर्थे तोलयन्नस्तीयाः। अभेदे ज्ञानानां की विशेषवशादर्थ इतरभेदानुमापकः। तथा च यतो निराकारतया ज्ञानानामर्थाभिन्न इतरभेदा
नुमापकः। अतः कर्मत्वं घटपटादीनां व्यवहारेषु विशिष्टबुद्ध्यादिषु क्रियायां घटपटादिरूप एव कार्याभिन्न इतरभेदानुमापक इति संपूर्णकारिकार्थः। विषयभेदाद्धि घटविता विशे
यमेदो ज्ञानभेदो नज्ञाततयेति भावः॥ ४॥ ननु यदर्शितयुक्त्या ईश्वरज्ञानस्य प्रमात्वेपि ईश्वरे प्रमातृत्व प्रामाण्यमनुपपन्नं। ईश्वरप्रमायाः नित्यतया तां प्रतीश्वरस्य समवा

अर्थेनैव विशेषो हि निराकारतया धियाम्॥ क्रियायामेव विशेषो हि व्यवहारेषु कर्मणाम्॥ मितिः सम्यक्परिच्छित्तिस्तद्वत्ता च प्रमातृता॥ तदयोगव्यवच्छेदः प्रामा
ण्यं गौतमे मते॥ ५॥ साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ भूतार्थानुभवे निविष्टनिखिलप्रस्तावि वस्तुक्रमः॥ लेशादृष्टिनिमित्तदुष्टिविगमप्रभ्र
ष्टशंकातुषः शंकोन्मेषकलंकिभिः किमपरैस्तन्मे प्रमाणं शिवः॥ ५॥ इति कुसुमांजलौ चतुर्थस्तबकः समाप्तः॥

धिकारणत्वाभावेन प्रमासमवायिकारणत्वलक्षणप्रमा[illegible]त्वस्य तत्राभावात्। तथा चेश्वरे प्रमातृत्वौल्कीर्तनं मंत्रायुर्वेदप्रामाण्यवदुक्तप्रामाण्यमाप्तप्रामाण्यादिति [illegible] आप्तस्तु प्रामाण्यौल्कीर्तनमसंग
तस्यादतः प्रामा[illegible]त्वकथनम्। ननु घई श्वरे प्रमातृत्व प्रामाण्युपपादयति। मितिः सम्यगिति। सम्यक्परिच्छित्तिर्यथार्थज्ञानं। मितिः प्रमा तद्वत्ता। यथार्थज्ञानरूपप्रमावत्ता। तथा च प्रमास
